# पवमान मण्डलम्

ॐ

## वेद् विज्ञान विष्टरम्

दत्तनगरम्, मैसूरु 570025

वेद विज्ञान विष्टरम्... शा001

# पवमान मण्डलम्

July 2021

Printed by
**Dhanush Print**
Mysore

**Published by**
**Veda Vijnaana Vishtaram**
**Sanatana Guru Sampradaya Pratishthanam**
**1, Lalitaramam, 3rd Cross, Datta Nagara, Ooty Road, Mysore 570025**
**Website - www.vedavishtaram.in/resources**
**Email - vedavishtaram@gmail.com**

# Fore Word

अथ यः पश्चाद्वाति। पवमान एव भूत्वा पश्चाद्वाति – इति श्रुतिः। सोमक्रतावभिषूयमाणस्य सोमस्य राज्ञः स्तुतौ, विनियुज्यमाना एते मन्त्राः, भारतवर्षे महीयन्ते। इन्द्रादि देवतोद्देशेन त्रिषु सवनेषु सोमरस निष्पत्ति पर्यवसायिन्यभिषव पूर्वक शोधनकर्मणि, सोमस्य बहुविधा प्रशस्ति रुच्चैस्तरां काशते। सह वर्तते उमया – इति व्युत्पत्तिमाश्रित्य, मन्त्राणामेषां शिवपरकत्वं, शोधकार्थक पूङ् धातो र्निष्पन्नस्य पवमान शब्दस्य वायु देवे रूढत्वात्, वायुदेवता परकत्वञ्च लोके प्रसिध्यति।

तथा च हरेर्वा, तत्सेवकस्य वायोर्वा, तत्पुत्रस्य हनुमतो वा कृपायास्ससिद्धये, शिवानुग्रहाय वैतेषां मन्त्राणां विनियोगमनेकत्र लभामहे। प्रयोक्तारश्च संसाधिताभिष्टा बहुलं दरीदृश्यन्त इत्यत्र नास्त्यतिशयवचः।

अभिषुत सोमस्य शोधनमिव सर्वकिल्बिषोन्मूलन मेभि र्मन्त्रै स्ससम्पद्यत इति, होमाभिषेकरूप विनियोगेन परमेश्वर प्रीणने निमित्तता च संभवतीति वेदार्थवेत्तृ समन्वयश्चकास्ति हि। तथाविधान् मन्त्रान् प्रतिपूर्णमासं, स्वीये दत्तपीठे होमविधौ विनियोज्य, निश्शेष भक्तजनानुजिघृक्षां प्रकटयन्तः परमपूज्याः श्रीगणपति सच्चिदानन्द स्वामिश्रीचरणाः ग्रन्थस्यास्य प्रकाशनाय स्वीयमाशीस्सम्पदं प्रयुञ्जते। दत्तपीठस्थित श्रीगणपति सच्चिदानन्द वेदपाठशाला विद्यार्थिनः मासिक होमविधिना सह, ग्रन्थस्यास्य प्रकाशने च यथाशक्ति समसेवन्तेति हेतुः, तेषामनुग्राह्यतां स्फुटयति।

अक्षर ग्रथने, दोषोन्मूलने च विहितप्रयत्नाः विद्वांसः सादरमभिनन्द्यन्ते। तदस्मिन्नवसरे, अस्माकं पवमानमन्त्रोपदेशकाः, सुप्रसिद्धयशो विशिष्टवैदुष्यवैभवाः, अवधूतदत्त पीठस्य वेदनिधि प्रशस्ति समलङ्कृताः, दिवङ्गताः, पि.वि.वेङ्कटकृष्ण भट्ट महोदया स्ससश्रद्धं स्मर्यन्ते।

पठतां श्रृण्वतां चैव ददाति परमां गतिम् – इति परिशिष्ट खिलमन्त्र भासित दिशा सर्वे वैदिकाः पारायणादि परायणा स्सन्तः, प्रत्यगात्माख्यातं पवमानं वायुं, नमो ब्रह्मणे – नमस्ते वायो इति श्रुत्या , वायुशब्दोपलक्षित सर्वान्तर्वर्ति परं ब्रह्म सर्वदोषोपशमनाय संभजेमहि।

इत्थं विद्वज्जन विधेयः,

वंशीकृष्ण घनपाठी

---

Index


FORE WORD ........................................................................2

नवमं मण्डलम्।। अथ पवमानम्।। ..................................4

षष्ठाष्टके अष्टमाध्यायः (वर्गाः 1-33) ..........................13

❀सप्तमाष्टकम् ..................................................................31

≡◊≡सप्तमाष्टके प्रथमाध्यायः (1-41)..............................31

सप्तमाष्टके द्वितीयाध्यायः (वर्गाः 1-33) .......................46

पूयमान मन्त्राः ................................................................56

सप्तमाष्टके तृतीयाध्यायः (वर्गाः 1-26) .........................65

सप्तमाष्टके चतुर्थाध्यायः (वर्गाः 1-28) .........................82

सप्तमाष्टके पञ्चमाध्यायः (वर्गाः 1-33)..........................99

पवमान मन्त्राणा मृषि च्छन्दो देवताः .........................118

पवमान (होमादि) प्रयोग सङ्कल्पः ................................120

अन्वाधानम् ....................................................................121

दानमन्त्राः .....................................................................122

## नवमं मण्डलम्।। अथ पवमानम्।।

(पावमाने नवमे मण्डले सप्तानुवाकाः-तत्र प्रथमेऽनुवाके चतुर्विंशति सूक्तानि।)

9.01 स्वादिष्ठयेति दशर्चस्य सूक्तस्य, वैश्वामित्रो मधुच्छन्दाः-पवमान.स्सोमो- गायत्री।।

❀06.07.16 卐स्वादिष्ठया मदिष्ठया- पवस्व सोम धारया। इन्द्राय पातवे सुतः।।

卐 रक्षोहा विश्वचर्षणि.-रभि योनि.मयोहतम्। द्रुणा सधस्थ. माऽसदत्।।

卐 वरिवोधातमो भव- मंहिष्ठो वृत्रहन्तमः। पर्षि राधो मघोनाम्।।

卐 अ.भ्यर्ष महाना.-न्देवानाँ वीति.मन्धसा। अभि वाज.मुत श्रवः।।

卐 त्वा.मच्छा चरामसि- त.दि.दर्थ.न्दिवेदिवे। इन्दो~ त्वे~ न^ आशसः।।

❀06.07.17 卐पुनाति ते परिस्रुतं- सोमं सूर्यस्य दुहिता। वारेण शश्वता तना।।

卐 त.मी.मण्वी.स्समर्य आ- गृभ्णन्ति योषणो दश। स्वसार॰ पार्ये दिवि।।

卐 त.मीं हिन्व.न्त्यग्रुवो- धमन्ति बाकुर.न्दृतिम्। त्रिधातु वारणं मधु।।

卐 अभी3(ई)म.मघ्न्या^ उत- श्रीणन्ति धेनव.श्शिशुम्। सोम.मिन्द्राय पातवे।।

卐 अस्ये.दिन्द्रो मदे.ष्वा- विश्वा वृत्राणि जिघ्नते। शूरो मघा च मंहते।।

9.02 पवस्वेति दशर्चस्य सूक्तस्य, काण्वो मेधातिथिः- पवमान.स्सोमो- गायत्री।।

06.07.18 卐पवस्व देववी.रति- पवित्रं सोम रंह्या। इन्द्र.मिन्दो~ वृषाऽविश।।

卐 आ वच्यस्व महि प्सरो- वृषेन्दो~ द्युम्नवत्तमः। आ योनि.न्धर्णसि.स्सदः।।

卐 अधुक्षत प्रियं मधु- धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः।।

卐 महान्त.न्त्वा मही.र.-न्वापो अर्षन्ति सिन्धवः। य.द्गोभि.र्वासयिष्यसे।।

卐 समुद्रो अप्सु मामृजे- विष्टम्भो धरुणो दिवः। सोमः पवित्रे अस्मयुः।।

06.07.19 卐अचिक्रद.द्वृषा हरि.-र्महा.न्मित्रो न दर्शतः। सं सूर्येण रोचते।।

卐 गिर.स्त इन्द~ ओजसा- मर्मृज्यन्ते अपस्युवः। याभि.र्मदाय शुम्भसे।।

卐 त.न्त्वा मदाय घृष्वय- उ लोककृत्नु.मीमहे। तव प्रशस्तयो महीः।।

卐 अस्मभ्य.मिन्द.विन्द्रयु.-र्मध्वः पवस्व धारया। पर्जन्यो वृष्टिमाँऽइव।।

卐 गोषा इन्दो~ नृषा अ.-स्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः।।

9.03 एष देव इति दशर्चस्य सूक्तस्याऽजीगर्ति. श्शुनश्शेप.स्सकृत्रिमो वैश्वामित्रो देवरातः- पवमान.स्सोमो- गायत्री।।

❀06.07.20 卐एष^ देवो अमर्त्यः- पर्णवीरिव दीयति। अभि द्रोणा.न्यासदम्।।

卐 एष^ देवो विपा कृतो-ऽति ह्वरांसि धावति। पवमानो अदाभ्यः।।

卐 एष^ देवो विपन्युभिः- पवमान^ ऋतायुभिः। हरि.र्वाजाय मृज्यते।।

卐 एष^ विश्वानि वार्या- शूरो यन्निव सत्वभिः। पवमान स्सिषासति।।

卐 एष^ देवो रथर्यति- पवमानो दशस्यति। आवि.ष्कृणोति वग्वनुम्।।

❀06.07.21 卐एष^ विप्रै.रभिष्टुतो-ऽपो देवो वि गाहते। दध.द्रत्नानि दाशुषे।।।

卐 एष^ दिवँ वि धावति- तिरो रजांसि धारया। पवमानः कनिक्रदत्।।

卐 एष^ दिवँ व्याऽसर.-त्तिरो रजां.स्यस्पृतः। पवमान.स्स्वध्वरः।।

卐 एष^ प्रत्नेन जन्मना- देवो देवेभ्य.स्सुतः। हरिः पवित्रे अर्षति।।

卐 एष^ उ स्य^ पुरुव्रतो- जज्ञानो जनय.न्निषः। धारया पवते सुतः।।

9.04 सना चेति दशर्चस्य सूक्तस्याऽऽङ्गिरसो हिरण्यस्तूपः- पवमान.स्सोमो- गायत्री।।

❀06.07.22 卐सना च सोम जेषि च- पवमान महि श्रवः। अथा नो वस्यस.स्कृधि।।

卐 सना ज्योति.स्सना स्व1(अ).-र्विश्वा च सोम सौभगा। अथा नो वस्यस.स्कृधि।।

卐 सना दक्ष.मुत क्रतु.-मप सोम मृधो जहि। अथा नो वस्यस.स्कृधि।।

卐 पवीतारः पुनीतन- सोम.मिन्द्राय पातवे। अथा नो वस्यस.स्कृधि।।

卐 त्वं सूर्ये न^ आ भज- तव क्रत्वा तवोतिभिः। अथा नो वस्यस.स्कृधि।।

❀06.07.23 卐तव क्रत्वा तवोतिभि.-र्ज्योक्पश्येम सूर्यम्। अथा नो वस्यस.स्कृधि।।

卐 अ.भ्यर्ष स्वायुध- सोम द्विबर्हसं रयिम्। अथा नो वस्यस.स्कृधि।।

卐 अभ्य1(अ)र्षाऽनपच्युतो- रयिं समत्सु सासहिः। अथा नो वस्यस.स्कृधि।।

卐 त्वाँ यज्ञै.रवीवृध.-न्पवमान विधर्मणि। अथा नो वस्यस.स्कृधि।।

卐 रयि.न्न.श्चित्र.मश्विन.-मिन्दो~ विश्वायु.मा भर। अथा नो वस्यस.स्कृधि।।

9.05 समिद्ध इत्येकादशर्चस्य सूक्तस्य, काश्यपोऽसितः- क्रमेणेध्म-स्तनूनपा-दिळो- बर्हि.र्देवी.र्द्वार- उषासानक्ता- दैव्यौ होतारौ- तिस्रो देव्य. स्सरस्वतीळा भारत्य.-स्त्वष्टा वनस्पति-स्स्वाहाकृतयो- गायत्री-अन्त्या.श्चतस्रोऽनुष्टुभः- (इत आरभ्य विंशति सूक्तेषु काश्यपो देवलोऽसितेन सह विकल्पते)।।

❀06.07.24 卐समिद्धो विश्वत.स्पतिः- पवमानो वि राजति। प्रीण.न्वृषा कनिक्रदत्।।

卐 तनूनपा.त्पवमान-श्शृङ्गे~ शिशानो अर्षति। अन्तरिक्षेण रारजत्।।

卐 ईळेन्यः पवमानो- रयि.र्वि राजति द्युमान्। मधो.र्धाराभि.रोजसा।।

卐 बर्हिः प्राचीन. मोजसा- पवमान.स्स्तृण.न्हरिः। देवेषु देव^ ईयते।।

卐 उ.दातै.र्जिहते बृह.-द्वारो देवी.र्हिरण्ययीः। पवमानेन सुष्टुताः।।

❀06.07.25 卐सुशिल्पे~ बृहती~ मही~- पवमानो वृषण्यति। नक्तोषासा न दर्शते~।।

卐 उभा देवा नृचक्षसा- होतारा दैव्या हुवे। पवमान^ इन्द्रो वृषा।।

卐 भारती पवमानस्य- सरस्व.तीळा मही। इम.न्नो यज्ञ.मा गम.-न्तिस्रो देवी. स्सुपेशसः।।

卐 त्वष्टार.मग्रजा.ङ्गोपां- पुरोयावान.मा हुवे। इन्दु.रिन्द्रो वृषा हरिः- पवमानः प्रजापतिः।।

卐 वनस्पतिं पवमान- मध्वा स.मङ्ग्धि धारया। सहस्रवल्शं हरितं- भ्राजमानं हिरण्ययम्।।

卐 विश्वे देवा.स्स्वाहाकृतिं- पवमानस्याऽऽ गत। वायु.र्बृहस्पति.स्सूर्यो-ऽग्नि. रिन्द्र.स्सजोषसः।।

9.06 मन्द्रयेति नवर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.07.26 卐मन्द्रया सोम धारया- वृषा पवस्व देवयुः। अव्यो वारे.ष्वस्मयुः।।

卐 अभि त्यं मद्यं मद.-मिन्द.विन्द्र^ इति क्षर। अभि वाजिनो अर्वतः।।

卐 अभि त्यं पूर्व्यं मदं- सुवानो अर्ष पवित्र आ। अभि वाज.मुत श्रवः।।

卐 अनु द्रप्सास^ इन्दव^- आपो न प्रवताऽसरन्न्। पुनाना^ इन्द्र.माशत।।

卐 य.मत्यमिव वाजिनं- मृजन्ति योषणो दश। वने क्रीळन्त.मत्यविम्।।

❀06.07.27 卐त.ङ्गोभि.र्वृषणं रसं- मदाय देववीतये। सुतं भराय सं सृज।।

卐 देवो देवाय धार.-येन्द्राय पवते सुतः। पयो य.दस्य पीपयत्।।

卐 आत्मा यज्ञस्य रंह्या-ऽसुष्वाणः पवते सुतः। प्रत्न.न्नि पाति काव्यम्।।

卐 एवा पुनान^ इन्द्रयु.-र्मदं मदिष्ठ वीतये। गुहा चि.द्दधिषे गिरः।।

9.07 असृग्र.मिति नवर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.07.28 卐असृग्र.मिन्दवः पथा- धर्म.न्नृतस्य सुश्रियः। विदाना^ अस्य योजनम्।।

卐 प्र धारा मध्वो अग्रियो- मही.रपो वि गाहते। हवि.र्हविष्षु वन्द्यः।।

卐 प्र युजो वाचो अग्रियो- वृषाऽव चक्रद.द्वने। सद्माऽभि सत्यो अध्वरः।।

卐 परि य.त्काव्या कवि.-र्नृम्णा वसानो अर्षति। स्व.र्वाजी ऽसिषासति।।

卐 पवमानो अभि स्पृधो- विशो राजेव सीदति। यदी.मृण्वन्ति वेधसः।।

❀06.07.29 卐अव्यो वारे परि प्रियो- हरि.र्वनेषु सीदति। रेभो वनुष्यते मती।।

卐 स^ वायु.मिन्द्र.मश्विना- साकं मदेन गच्छति। रणा यो अस्य धर्मभिः।

卐 आ मित्रावरुणा भगं- मध्वः पवन्त ऊर्मयः। विदाना^ अस्य शक्मभिः।।

卐 अस्मभ्यं रोदसी~ रयिं- मध्वो वाजस्य सातये। श्रवो वसूनि स.ञ्जितम्।।

9.08 एते सोमा इति नवर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.07.30 卐एते सोमा^ अभि प्रिय.-मिन्द्रस्य काम.मक्षरन्न्। वर्धन्तो अस्य वीर्यम्।।

卐 पुनानास.श्चमूषदो- गच्छन्तो वायु.मश्विना। ते नो धान्तु सुवीर्यम्।।

卐 इन्द्रस्य सोम राधसे- पुनानो हार्दि चोदय। ऋतस्य योनि.मासदम्।।

卐 मृजन्ति त्वा दश क्षिपो- हिन्वन्ति सप्त धीतयः। अनु विप्रा^ अमादिषुः।।

卐 देवेभ्य.स्त्वा मदाय कं- सृजान.मति मेष्यः। स.ङ्गोभि.र्वासयामसि।।

❀06.07.31 卐पुनानः कलशे.ष्वा- वस्त्रा.ण्यरुषो हरिः। परि गव्या.न्यव्यत।।

卐 मघोन^ आ पवस्व नो- जहि विश्वा^ अप द्विषः। इन्दो~ सखाय.मा विश।।

卐 वृष्टि.न्दिवः परि स्रव- द्युम्नं पृथिव्या^ अधि। सहो न.स्सोम पृत्सु धाः।।

卐 नृचक्षस.न्त्वा वय.-मिन्द्रपीतं स्वर्विदम्। भक्षीमहि प्रजा.मिषम्।।

9.09 परि प्रियेति नवर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.07.32 卐परि प्रिया दिवः कवि.-र्वयांसि नप्त्यो.र्हितः। सुवानो याति कविक्रतुः।।
卐 प्रप्र क्षयाय पन्यसे- जनाय जुष्टो अद्रुहे। वी.त्यर्ष चनिष्ठया।।
卐 स^ सूनु. र्मातरा शुचि.-र्जातो जाते~ अरोचयत्। महा.न्मही~ ऋतावृधा।।
卐 स^ सप्त धीतिभि. र्हितो- नद्यो अजिन्व.द्द्रुहः। या^ एक.मक्षि वावृधुः।।
卐 ता^ अभि सन्त.मस्तृतं- महे युवान.मा दधुः। इन्दु.मिन्द्र तव व्रते।।
❀06.07.33 卐अभि वह्नि.रमर्त्य.-स्सप्त पश्यति वावहिः। क्रिवि.र्देवी.रतर्पयत्।।
卐 अवा कल्पेषु नः पुम.-स्तमांसि सोम योध्या। तानि पुनान जङ्घनः।।
卐 नू नव्यसे नवीयसे- सूक्ताय साधया पथः। प्रत्नव.द्रोचया रुचः।।
卐 पवमान महि श्रवो- गा.मश्वं रासि वीरवत्। सना मेधां सना स्वः'।।
9.10 प्र स्वानास इति नवर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।
❀06.07.34 卐प्र स्वानासो रथा^इवा-ऽर्वन्तो न श्रवस्यवः। सोमासो राये अक्रमुः।।
卐 हिन्वानासो रथा^इव- दधन्विरे गभस्त्योः। भरासः कारिणामिव।।
卐 राजानो न प्रशस्तिभि.-स्सोमासो गोभि.रञ्जते। यज्ञो न सप्त धातृभिः।।
卐 परि सुवानास^ इन्दवो- मदाय बर्हणा गिरा। सुता^ अर्षन्ति धारया।।

卐 आपानासो विवस्वतो- जनन्त^ उषसो भगम्। सूरा^ अण्वँ वि तन्वते।।

❀06.07.35 卐अप द्वारा मतीनां- प्रत्ना^ ऋण्वन्ति कारवः। वृष्णो हरस आयवः।।

卐 समीचीनास^ आसते- होतार.स्सप्तजामयः। पद.मेकस्य पिप्रतः।।

卐 नाभा नाभि.न्न^ आ ददे- चक्षु.श्चि.त्सूर्ये सचा। कवे.रपत्य.मा दुहे।।

卐 अभि प्रिया दिव.स्पद.-मध्वर्युभि.र्गुहा हितम्। सूरः पश्यति चक्षसा।।

9.11 उपाऽस्मा इति नवर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.07.36 卐उपाऽस्मै गायता नरः- पवमाना.येन्दवे। अभि देवा इयक्षते।।

卐 अभि ते मधुना पयो-ऽथर्वाणो अशिश्रयुः। देव.न्देवाय देवयु।।

卐 स^ नः पवस्व श.ङ्गवे- श.ञ्जनाय श.मर्वते। शं राज.न्नोषधीभ्यः।।

卐 बभ्रवे नु स्वतवसे-ऽरुणाय दिविस्पृशे। सोमाय गाथ.मर्चत।।

卐 हस्तच्युतेभि.रद्रिभि.-स्सुतं सोमं पुनीतन। मधा.वा धावता मधु।।

❀06.07.37 卐नमसे.दुप सीदत- दध्ने.दभि श्रीणीतन। इन्दु.मिन्द्रे दधातन।।

卐 अमित्रहा विचर्षणिः- पवस्व सोम श.ङ्गवे। देवेभ्यो अनुकामकृत्।।

卐 इन्द्राय सोम पातवे- मदाय परिषिच्यसे। मनश्चि.न्मनस.स्पतिः।।

卐 पवमान सुवीर्यं- रयिं सोम रिरीहि नः। इन्द.विन्द्रेण नो युजा।।

9.12 सोमा असृग्र.मिति नवर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

06.07.38 सोमा^ असृग्र.मिन्दव.-स्सुता^ ऋतस्य सादने। इन्द्राय मधुमत्तमाः।।

अभि विप्रा^ अनूषत- गावो वत्स.न्न मातरः। इन्द्रं सोमस्य पीतये।।

मदच्यु.त्क्षेति सादने- सिन्धो.रूर्मा विपश्चित्। सोमो गौरी~ अधि श्रितः।।

दिवो नाभा विचक्षणो-ऽव्यो वारे महीयते। सोमो य.स्सुक्रतुः कविः।।

य.स्सोमः कलशे.ष्वाँ- अन्तः~ पवित्र आहितः। त.मिन्दुः परिषस्वजे।।

06.07.39 प्र वाच.मिन्दु.रिष्यति- समुद्रस्याऽधि विष्टपि। जिन्व.न्कोशं मधुश्चुतम्।।

नित्यस्तोत्रो वनस्पति.-र्धीना.मन्त.'स्सबर्दुघः। हिन्वानो मानुषा युगा।।

अभि प्रिया दिव.स्पदा- सोमो हिन्वानो अर्षति। विप्रस्य धारया कविः।।

आ पवमान धारय- रयिं सहस्रवर्चसम्। अस्मे~ इन्दो~ स्वाभुवम्।।।।

इति सप्तमाध्याय स्समाप्तः।।

## षष्ठाष्टके अष्टमाध्यायः (वर्गाः 1-33)

9.13 सोमः पुनान^ इति नवर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.08.01 卐सोमः पुनानो अर्षति- सहस्रधारो अत्यविः। वायो.रिन्द्रस्य निष्कृतम्।।

卐 पवमान.मवस्यवो- विप्र. मभि प्र गायत। सुष्वाण.न्देववीतये।।

卐 पवन्ते वाजसातये- सोमा.स्सहस्रपाजसः। गृणाना^ देववीतये।।

卐 उत नो वाजसातये- पवस्व बृहती.रिषः। द्युम.दिन्दो~ सुवीर्यम्।।

卐 ते न.स्सहस्रिणं रयिं- पवन्ता.मा सुवीर्यम्। सुवाना^ देवास^ इन्दवः।।

❀06.08.02 卐अत्या^ हियाना^ न हेतृभि.-रसृग्रँ वाजसातये। वि वार.मव्य.माशवः।।

卐 वाश्रा^ अर्ष.न्तीन्दवो-ऽभि वत्स.न्न धेनवः। दधन्विरे गभस्त्योः।।

卐 जुष्ट^ इन्द्राय मत्सरः- पवमान कनिक्रदत्। विश्वा^ अप द्विषो जहि।।

卐 अपघ्नन्तो अराव्णः- पवमाना.स्स्वर्दृशः। योना.वृतस्य सीदत।।

9.14 परि प्रे.त्यष्टर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.08.03 卐परि प्राऽसिष्यद.त्कवि.-स्सिन्धो.रूर्मा.वधि श्रितः। कारं बिभ्र.त्पुरुस्पृहम्।।

卐 गिरा यदी सबन्धवः- पञ्च व्राता^ अपस्यवः। परिष्कृण्वन्ति धर्णसिम्।।

卐 आ.दस्य शुष्मिणो रसे- विश्वे देवा^ अमत्सत। यदी गोभि.र्वसायते।।

卐 निरिणानो वि धावति- जह.च्छर्याणि तान्वा। अत्रा स.ञ्जिघ्नते युजा।।

卐 नप्तीभि.र्यो विवस्वत.-श्शुभ्रो न मामृजे युवा। गाः कृण्वानो न निर्णिजम्।।
❀06.08.04 卐अति श्रिती तिरश्चता- गव्या जिगा.त्यण्व्या। वग्नु.मियर्ति यँ विदे।।
卐 अभि क्षिप.स्स.मग्मत- मर्जयन्ती.रिष.स्पतिम्। पृष्ठा गृभ्णत वाजिनः।।
卐 परि दिव्यानि मर्मृश.-द्विश्वानि सोम पार्थिवा। वसूनि या.ह्यस्मयुः।।
9.15 एष धिये.त्यष्टर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।
❀06.08.05 卐एष^ धिया या.त्यण्व्या- शूरो रथेभि.राशुभिः। गच्छ.न्निन्द्रस्य निष्कृतम्।।
卐 एष^ पुरू धियायते- बृहते देवतातये। यत्राऽमृतास^ आसते।।
卐 एष^ हितो वि नीयते-ऽन्त.'श्शुभ्रावता पथा। यदी तुञ्जन्ति भूर्णयः।।
卐 एष^ शृङ्गाणि दोधुव.-च्छिशीते यूथ्यो3(ओ) वृषा। नृम्णा दधान^ ओजसा।।
卐 एष^ रुक्मिभि.रीयते- वाजी शुभ्रेभि.रंशुभिः। पति.स्सिन्धूनां भवन्न्।।
卐 एष^ वसूनि पिब्दना- परुषा ययिवाँ अति। अव शादेषु गच्छति।।
卐 एतं मृजन्ति मर्ज्य.-मुप द्रोणे.ष्वायवः। प्रचक्राणं मही.रिषः।।
卐 एत.मु त्य.न्दश क्षिपो- मृजन्ति सप्त धीतयः। स्वायुधं मदिन्तमम्।।

9.16 प्र ते सोतार^ इत्यष्टर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.08.06 卐प्र ते सोतार^ ओण्यो3(ओ)- रसं मदाय घृष्वये। सर्गो न तक्त्येतशः।।

卐 क्रत्वा दक्षस्य रथ्य.-मपो वसान.मन्धसा। गोषा.मण्वेषु सश्चिम।।

卐 अनप्त.मप्सु दुष्टरं- सोमं पवित्र आ सृज। पुनीहीन्द्राय पातवे।।

卐 प्र पुनानस्य चेतसा- सोमः पवित्रे अर्षति। क्रत्वा सधस्थ.माऽसदत्।।

卐 प्र त्वा नमोभि.रिन्दव^- इन्द्र सोमा^ असृक्षत। महे भराय कारिणः।।

卐 पुनानो रूपे अव्यये- विश्वा^ अर्ष.न्नभि श्रियः। शूरो न गोषु तिष्ठति।।

卐 दिवो न सानु पिप्युषी- धारा सुतस्य वेधसः। वृथा पवित्रे अर्षति।।

卐 त्वं सोम विपश्चित.-न्तना पुनान^ आयुषु। अव्यो वारँ वि धावसि।।

9.17 प्र निम्नेनेवे.त्यष्टर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.08.07 卐प्र निम्नेनेव सिन्धवो- घ्नन्तो वृत्राणि भूर्णयः। सोमा^ असृग्र.माशवः।।

卐 अभि सुवानास^ इन्दवो- वृष्टयः पृथिवीमिव। इन्द्रं सोमासो अक्षरन्न्।।

卐 अत्यूर्मि.र्मत्सरो मद.-स्सोमः पवित्रे अर्षति। विघ्न.न्रक्षांसि देवयुः।।

卐 आ कलशेषु धावति- पवित्रे परिषिच्यते। उक्थै.र्यज्ञेषु वर्धते।।

卐 अति त्री सोम रोचना- रोह.न्न भ्राजसे दिवम्। इष्ण.न्त्सूर्य.न्न चोदयः।।

卐 अभि विप्रा^ अनूषत- मूर्ध.न्यज्ञस्य कारवः। दधाना.श्चक्षसि प्रियम्।।

卐 त.मु त्वा वाजिन.न्नरो- धीभि.र्विप्रा^ अवस्यवः। मृजन्ति देवतातये।।

卐 मधो.र्धारा.मनु क्षर- तीव्र.स्सधस्थ.माऽसदः। चारुर् ऋताय पीतये।।

9.18 परि सुवान इति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.08.08 卐परि सुवानो गिरिष्ठाः- पवित्रे सोमो अक्षाः'। मदेषु सर्वधा^ असि।।

卐 त्वं विप्र.स्त्व.ङ्कवि.-र्मधु प्र जात.मन्धसः। मदेषु सर्वधा^ असि।।

卐 तव विश्वे सजोषसो- देवासः पीति.माशत। मदेषु सर्वधा^ असि।।

卐 आ यो विश्वानि वार्या- वसूनि हस्तयो.र्दधे। मदेषु सर्वधा^ असि।।

卐 य^ इमे~ रोदसी~ मही~- सं मातरेव दोहते। मदेषु सर्वधा^ असि।।

卐 परि यो रोदसी~ उभे~- सद्यो वाजेभि.रर्षति। मदेषु सर्वधा^ असि।।

卐 स^ शुष्मी कलशे.ष्वा- पुनानो अचिक्रदत्। मदेषु सर्वधा^ असि।।

9.19 यत्सोमेति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.08.09 卐य.त्सोम चित्र.मुक्थ्य.-न्दिव्यं पार्थिवँ वसु। त.न्नः पुनान^ आ भर।।

卐 युवं हि स्थ.स्स्वर्पती~- इन्द्र.श्च सोम गोपती~। ईशाना पिप्यत.न्धियः।।

卐 वृषा पुनान^ आयुषु- स्तनय.न्नधि बर्हिषि। हरि.स्स.न्योनि.माऽसदत्।।
卐 अवावशन्त धीतयो- वृषभस्याऽधि रेतसि। सूनो.र्वत्सस्य मातरः।।
卐 कुवि.द्वृषण्यन्तीभ्यः- पुनानो गर्भ.मादधत्। या^ श्शुक्र.न्दुहते पयः।।
卐 उप शिक्षाऽपतस्थुषो- भियस.मा धेहि शत्रुषु। पवमान विदा^ रयिम्।।
卐 नि शत्रो.स्सोम वृष्ण्य.-न्नि शुष्म.न्नि वय.स्तिर। दूरे वा सतो अन्ति वा।।

9.20 प्र कवि.रिति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

06.08.10 卐प्र कवि.र्देववीतये-ऽव्यो वारेभि.रर्षति। साह्वा.न्विश्वा^ अभि स्पृधः।।
卐 स^ हि ष्मा जरितृभ्य^ आ- वाज.ङ्गोमन्त.मिन्वति। पवमान. स्सहस्रिणम्।।
卐 परि विश्वानि चेतसा- मृशसे पवसे मती। स^ न.स्सोम श्रवो विदः।।
卐 अभ्यर्ष बृह.द्यशो- मघवद्भ्यो ध्रुवं रयिम्। इषं स्तोतृभ्य^ आ भर।।
卐 त्वं राजेव सुव्रतो- गिर.स्सोमाऽऽ विवेशिथ। पुनानो वह्ने अद्भुत।।
卐 स^ वह्नि.रप्सु दुष्टरो- मृज्यमानो गभस्त्योः। सोम.श्चमूषु सीदति।।
卐 क्रीळु.र्मखो न मंहयुः- पवित्रं सोम गच्छसि। दध.त्स्तोत्रे सुवीर्यम्।।

9.21 एते धावन्तीति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः- पवमान.स्सोमो- गायत्री।।

❀06.08.11 卐एते धाव.न्तीन्दव.-स्सोमा^ इन्द्राय घृष्वयः। मत्सरास.स्स्वर्विदः।।

卐 प्रवृण्वन्तो अभियुज.- ¤स्सुष्वये वरिवोविदः। स्वयं स्तोत्रे वयस्कृतः।।

卐 वृथा क्रीळन्त^ इन्दव.-स्सधस्थ.म.भ्येक.मित्। सिन्धो.रूर्मा व्यक्षरन्न्।।

卐 एते विश्वानि वार्या- पवमानास^ आशत। हिता^ न सप्तयो रथे।।

卐 आऽस्मि.न्पिशङ्ग.मिन्दवो- दधाता वेन.मादिशे। यो अस्मभ्य.मरावा।।

卐 ऋभु.र्न रथ्य.न्नव.-न्दधाता केत.मादिशे। शुक्राः पवध्व.मर्णसा।।

卐 एत उ त्ये अवीवश.-न्काष्ठाँ वाजिनो अक्रत। सतः प्राऽसाविषु.र्मतिम्।।

9.22 एते सोमास इति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान.स्सोमो- गायत्री।।

❀06.08.12 卐एते सोमास^ आशवो- रथा^इव प्र वाजिनः। सर्गा.स्सृष्टा^ अहेषत।।

卐 एते वाता^इवोरवः- पर्जन्यस्येव वृष्टयः। अग्नेरिव भ्रमा^ वृथा।।

卐 एते पूता^ विपश्चित.-स्सोमासो दध्याशिरः। विपा व्यानशु.र्धियः।।

卐 एते मृष्टा^ अमर्त्या.-स्ससृवांसो न शश्रमुः। इयक्षन्तः पथो रजः।।

卐 एते पृष्ठानि रोदसो.-र्विप्रयन्तो व्यानशुः। उ.तेद.मुत्तमं रजः।।

卐 तन्तु.न्तन्वान.मुत्तम.-मनु प्रवत^ आशत। उतेद.मुत्तमाय्यम्।।

卐 त्वं सोम पणिभ्य^ आ- वसु गव्यानि धारयः। तत.न्तन्तु.मचिक्रदः।।

9.23 सोमा असृग्रमिति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान.स्सोमो- गायत्री।।

06.08.13 सोमा॑ असृग्र.माशवो- मधो.र्मदस्य धारया। अभि विश्वा॑नि काव्या॑।।

अनु प्रत्नास॑ आयवः- पद.न्नवी॑यो अक्रमुः। रुचे जनन्त सूर्य॑म्।।

आ पवमान नो भरा-ऽर्यो अदा॑शुषो गय॑म्। कृधि प्रजावती.रिषः।।

अभि सोमा॑स आयवः- पव॑न्ते मद्यं मद॑म्। अभि कोशं मधुश्चु॑तम्।।

सोमो॑ अर्षति धर्णसि.-र्दधान॑ इन्द्रियं र॑सम्। सुवीरो॑ अभिशस्तिपाः।।

इन्द्रा॑य सोम पवसे- देवेभ्य.स्सधमाद्यः। इन्दो~ वाजं सिषाससि।।

अस्य पीत्वा मदा॑ना.-मिन्द्रो॑ वृत्रा.ण्यप्रति। जघान जघन.च्च नु।।

---

द्वितीयेऽनुवाके षड्विंशत्सूक्तानि।।

9.24 प्र सोमास॑ इति सप्तर्चस्य सूक्तस्य, काश्यपोऽसितः-पवमान.स्सोमो- गायत्री।।

06.08.14 प्र सोमा॑सो अधन्विषुः- पवमानास॑ इन्दवः। श्रीणाना॑ अप्सु मृ॑ञ्जत।।

अभि गावो॑ अधन्विषु.-रापो न प्रवता॑ यतीः। पुनाना॑ इन्द्र.माशत।।

प्र पवमान धन्वसि- सोमेन्द्रा॑य पातवे। नृभि.र्यतो वि नी॑यसे।।

त्वं सो॑म नृमादनः- पवस्व चर्षणी॑सहे। सस्नि.र्यो अनुमाद्यः।।

इन्दो~ य.दद्रिभि.स्सुतः- पवित्रं परिधाव॑सि। अर.मिन्द्रस्य धाम्ने॑।।

卐 पवस्व वृत्रहन्त.-मोक्थेभि.रनुमाद्यः। शुचिः॒ पावको अद्भुतः।।

卐 शुचिः॒ पावक^ उच्यते- सोम.स्सुतस्य मध्वः। देवाऽवी.रघशंसहा।।

9.25 पवस्वेति षळृचस्य सूक्तस्याऽगस्त्यो दृळ्हच्युतः- पवमान.स्सोमो- गायत्री।।

❀06.08.15 卐पवस्व दक्षसाधनो- देवेभ्यः॒ पीतये हरे। मरुद्भ्यो वायवे मदः।।

卐 पवमान धिया हितो3(ओ)-ऽभि योनि.ङ्कनिक्रदत्। धर्मणा वायु.मा विश।।

卐 स.न्देवै.श्शोभते वृषा- कवि.र्योना.वधि प्रियः। वृत्रहा देववीतमः।।

卐 विश्वा रूपा.ण्याविश.-न्पुनानो याति हर्यतः। यत्राऽमृतास^ आसते।।

卐 अरुषो जनय.न्गिर.-स्सोमः॒ पवत आयुषक्। इन्द्र.ङ्गच्छ.न्कविक्रतुः।।

卐 आ पवस्व मदिन्तम- पवित्र.न्धारया कवे। अर्कस्य योनि.मासदम्।।

9.26 त.ममृक्षन्तेति षळृचस्य सूक्तस्य, दार्ढच्युत^ इध्मवाहः- पवमान.स्सोमो- गायत्री।।

❀06.08.16 卐त.ममृक्षन्त वाजिन.-मुपस्थे अदिते.रधि। विप्रासो अण्व्या धिया।।

卐 त.ङ्गावो अभ्यनूषत- सहस्रधार.मक्षितम्। इन्दु.न्धर्तार.मा दिवः।।

卐 तँ वेधां मेधयाऽह्य.-न्पवमान.मधि द्यवि। धर्णसिं भूरिधायसम्।।

卐 त.मह्य.न्भुरिजो.र्धिया- सँवसानँ विवस्वतः। पतिँ वाचो अदाभ्यम्।।

卐 तं साना.वधि जामयो- हरिं हिन्व.न्त्यद्रिभिः। हर्यतं भूरिचक्षसम्।।

卐 त.न्त्वा हिन्वन्ति वेधसः- पवमान गिरावृधम्। इन्द.विन्द्राय मत्सरम्।।

9.27 एष^ कविरिति षळृचस्य सूक्तस्याऽऽङ्गिरसो नृमेधः- पवमान.स्सोमो- गायत्री।।

❀06.08.17 卐एष^ कवि.रभिष्टुतः- पवित्रे अधि तोशते। पुनानो घ्न.न्नप स्रिधः।।

卐 एष^ इन्द्राय वायवे- स्वर्जि.त्परि षिच्यते। पवित्रे दक्षसाधनः।।

卐 एष^ नृभि.र्वि नीयते- दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित्।।

卐 एष^ गव्यु.रचिक्रद.-त्पवमानो हिरण्ययुः। इन्दु.स्सत्राजि.दस्तृतः।।

卐 एष^ सूर्येण हासते- पवमानो अधि द्यवि। पवित्रे मत्सरो मदः।।

卐 एष^ शु.ष्म्यसिष्यद.-दन्तरिक्षे वृषा हरिः। पुनान^ इन्दु.रिन्द्र.मा।।

9.28 एष^ वाजीति षळृचस्य सूक्तस्याऽऽङ्गिरसः प्रियमेधः- पवमान.स्सोमो- गायत्री।।

❀06.08.18 卐एष^ वाजी हितो नृभि.-र्विश्ववि.न्मनस.स्पतिः। अव्यो वारँ वि धावति।।

卐 एष^ पवित्रे अक्षर.-त्सोमो देवेभ्य.स्सुतः। विश्वा धामा.न्याविशन्।।

卐 एष^ देव.श्शुभायते-ऽधि योना.वमर्त्यः। वृत्रहा देववीतमः।।

卐 एष^ वृषा कनिक्रद.-द्दशभि.र्जामिभि.र्यतः। अभि द्रोणानि धावति।।

卐 एष^ सूर्य.मरोचय.-त्पवमानो विचर्षणिः। विश्वा धामानि विश्ववित्।।

卐 एष॑ शु॒.ष्म्यदा॑भ्य॒.-स्सोमः॑ पुना॒नो अ॑र्षति। दे॒वा॒ऽवी.र॑घशंस॒हा।।

🏺 9.29 प्राऽस्य धारा॑ इति षळृचस्य सूक्तस्याऽऽङ्गिरसो नृमेधः-पवमान.स्सोमो- गायत्री।।

❀06.08.19 卐प्राऽस्य॒ धारा॑ अक्षर॒.-न्वृष्ण॑.स्सु॒त.स्यौ॑जसा। दे॒वा॒ऽ अनु॑ प्र॒भूष॑तः।।

卐 सप्तिं॑ मृजन्ति वे॒धसो॑- गृ॒णन्तः॑ का॒रवो॑ गि॒रा। ज्योति॑.र्जज्ञा॒न.मु॒क्थ्य॑म्।।

卐 सु॒षहा॑ सोम॒ तानि॑ ते- पुना॒नाय॑ प्रभूवसो~। वर्धा॑ समु॒द्र.मु॒क्थ्य॑म्।।

卐 विश्वा॒ वसू॑नि स॒ञ्जय॒.-न्पवस्व सोम॒ धार॑या। इ॒नु द्वेषां॑सि स॒ध्र्य॑क्।।

卐 रक्षा॒ सु नो॒ अर॑रुष.-स्स्व॒ना.त्समस्य॒ कस्य॑ चित्। नि॒दो यत्र॑ मुमु॒च्महे॑।।

卐 एन्दो॒~ पार्थि॑वं र॒यि.-न्दि॒व्यं प॑वस्व॒ धार॑या। द्यु॒मन्तं॒ शुष्म॒.मा भ॑र।।

🏺 9.30 प्र धारा इति षळृचस्य सूक्तस्याऽऽङ्गिरसो बिन्दुः- पवमान.स्सोमो-गायत्री।।

❀06.08.20 卐प्र धारा॑ अस्य शु॒ष्मिणो॒- वृथा॑ प॒वित्रे॑ अक्षरन्। पु॒ना॒नो वाच॑.मिष्यति।।

卐 इन्दु॑.र्हियान॒.स्सोतृ॒भि.-र्मृ॒ज्यमा॑नः॒ कनि॑क्रदत्। इय॑र्ति व॒ग्नु.मि॑न्द्रि॒यम्।।

卐 आ न॒.श्शुष्म॑.न्नृ॒षाह्यँ॑- वी॒रव॑न्तं पुरु॒स्पृह॑म्। पवस्व सोम॒ धार॑या।।

卐 प्र सोमो॒ अति॒ धार॑या- प॒वमानो असिष्यदत्। अ॒भि द्रोणा॑.न्यास॒द॑म्।।

卐 अ॒प्सु त्वा॒ मधु॒मत्तमं॒- हरिं॑ हिन्व॒.न्त्यद्रि॑भिः। इन्द॒.विन्द्राय पी॒तये॑।।

卐 सु॒नोता॒ मधु॒मत्तमं॒- सोम॒.मिन्द्राय व॒ज्रिणे॑। चारुं॒ शर्धा॑य मत्स॒रम्।।

9.31 प्र सोमास इति षळृचस्य सूक्तस्य, राहूगणो गोतमः- पवमान.स्सोमो- गायत्री।।

06.08.21 प्र सोमास.स्स्वाध्य1(अ॰)- पवमानासो अक्रमुः। रयि.ङ्कृण्वन्ति चेतनम्।।

दिव. स्पृथिव्या^ अधि- भवेन्दो~ द्युम्नवर्धनः। भवा वाजानां पतिः।।

तुभ्यँ वाता^ अभिप्रिय.-स्तुभ्य.मर्षन्ति सिन्धवः। सोम वर्धन्ति ते महः।।

पुन आ प्यायस्व समेतु ते- विश्वत.स्सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे।।*

तुभ्य.ङ्गावो घृतं पयो- बभ्रो~ दुदुह्रे अक्षितम्। वर्षिष्ठे अधि सानवि।।

स्वायुधस्य ते सतो- भुवनस्य पते वयम्। इन्दो~ सखित्व.मुश्मसि।।

9.32 प्र सोमास इति षळृचस्य सूक्तस्याऽऽत्रेय.श्श्यावाश्वः- पवमान.स्सोमो- गायत्री।।

06.08.22 प्र सोमासो मदच्युत.-श्श्रवसे नो मघोनः। सुता^ विदथे अक्रमुः।।

आ.दीं.त्रितस्य योषणो- हरिं हिन्व.न्त्यद्रिभिः। इन्दु.मिन्द्राय पीतये।।

आ.दीं हंसो यथा गणँ- विश्वस्याऽवीवश.न्मतिम्। अत्यो न गोभि. रज्यते।।

उभे~ सोमाऽवचाकश.-न्मृगो न तक्तो अर्षसि। सीद.न्नृतस्य योनि.मा।।

अभि गावो अनूषत- योषा जारमिव प्रियम्। अग.न्नाजिँ यथा हितम्।।

卐 अस्मे~ धेहि द्युम.द्यशो- मघवद्भ्य.श्च मह्य.ञ्च। सनिं मेधा.मुत श्रवः।।

9.33 प्र सोमास इति षळृचस्य सूक्तस्याऽऽत्स्यस्त्रितः- पवमान.स्सोमो- गायत्री।।

❀06.08.23 卐प्र सोमासो विपश्चितो-ऽपा.न्न य.न्त्यूर्मयः। वनानि महिषा^इव।।

卐 अभि द्रोणानि बभ्रव.-श्शुक्रा^ ऋतस्य धारया। वाज.ङ्गोमन्त.मक्षरन्न्।।

卐 सुता^ इन्द्राय वायवे- वरुणाय मरुद्भ्यः। सोमा^ अर्षन्ति विष्णवे।।

卐 तिस्रो वाच^ उ.दीरते- गावो मिमन्ति धेनवः। हरि.रेति कनिक्रदत्।।

卐 अभि ब्रह्मी.रनूषत- यह्वीर् ऋतस्य मातरः। मर्मृज्यन्ते दिव.श्शिशुम्।।

卐 राय.स्समुद्रां.श्चतुरो-ऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणः।।

9.34 प्र सुवान^ इति षळृचस्य सूक्तस्याऽऽत्स्यस्त्रितः- पवमान.स्सोमो- गायत्री।।

❀06.08.24 卐प्र सुवानो धारया त.-न्नेन्दु.र्हिन्वानो अर्षति। रुज.द्दृळ्हा व्योजसा।।

卐 सुत^ इन्द्राय वायवे- वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे।।

卐 वृषाणँ वृषभि.र्यतं- सुन्वन्ति सोम.मद्रिभिः। दुहन्ति शक्मना पयः।।

卐 भुव.स्त्रितस्य मर्ज्यो- भुव.दिन्द्राय मत्सरः। सं रूपै.रज्यते हरिः।।

卐 अभी.मृतस्य विष्टप.-न्दुहते पृश्निमातरः। चारु प्रियतमं हविः।।

卐 स.मेन.मह्रुता^ इमा^- गिरो अर्षन्ति सस्रुतः। धेनू.र्वाश्रो अवीवशत्।।

9.35 आ नः पवस्वेति षळृचस्य सूक्तस्याऽऽङ्गिरसः प्रभूवसुः- पवमान.स्सोमो- गायत्री।।

❀06.08.25 卐आ नः॰ पवस्व धारया- पवमान रयिं पृथुम्। यया ज्योति.र्विदासि नः।।

卐 इन्दो~ समुद्र.मीङ्ख्य- पवस्व विश्वमेजय। रायो धर्ता न^ ओजसा।।

卐 त्वया वीरेण वीरवो-ऽभि ष्याम पृतन्यतः। क्षरा णो अभि वार्यम्।।

卐 प्र वाज.मिन्दु.रिष्यति- सिषास.न्वाजसा^ ऋषिः। व्रता विदान^ आयुधा।।

卐 त.ङ्गीर्भि.र्वाचमीङ्ख्यं- पुनानँ वासयामसि। सोम.ञ्जनस्य गोपतिम्।।

卐 विश्वो यस्य व्रते जनो- दाधार धर्मण.स्पतेः। पुनानस्य प्रभूवसोः।।

9.36 असर्जीति षळृचस्य सूक्तस्याऽऽङ्गिरसः प्रभूवसुः- पवमान.स्सोमो- गायत्री।।

❀06.08.26 卐असर्जि रथ्यो यथा- पवित्रे चम्वो.स्सुतः। कार्ष्म.न्वाजी न्यक्रमीत्।।

卐 स^ वह्नि.स्सोम जागृविः॰- पवस्व देववी.रति। अभि कोशं मधुश्चुतम्।।

卐 स^ नो ज्योतींषि पूर्व्य- पवमान वि रोचय। क्रत्वे दक्षाय नो हिनु।।

卐 शुम्भमान^ ऋतायुभि.-र्मृज्यमानो गभस्त्योः। पवते वारे अव्यये।।

卐 स^ विश्वा दाशुषे वसु- सोमो दिव्यानि पार्थिवा। पवता.माऽन्तरिक्ष्या।।

卐 आ दिव.स्पृष्ठ.मश्वयु.-र्गव्ययु.स्सोम रोहसि। वीरयु.श्शवस.स्पते।।

🏺 9.37 स^ सुत इति षळृचस्य सूक्तस्याऽऽङ्गिरसो रहूगणः- पवमान.स्सोमो- गायत्री।।

❀06.08.27 卐स^ सुतः पीतये वृषा- सोमः पवित्रे अर्षति। विघ्न.न्रक्षांसि देवयुः।।

卐 स^ पवित्रे विचक्षणो- हरि.रर्षति धर्णसिः। अभि योनि.ङ्कनिक्रदत्।।

卐 स^ वाजी रोचना दिवः- पवमानो वि धावति। रक्षोहा वार.मव्ययम्।।

卐 स^ त्रितस्याऽधि सानवि- पवमानो अरोचयत्। जामिभि.स्सूर्यं सह।।

卐 स^ वृत्रहा वृषा सुतो- वरिवोवि.ददाभ्यः। सोमो वाजमिवाऽसरत्।।

卐 स^ देवः कविनेषितो3(ओ)-ऽभि द्रोणानि धावति। इन्दु.रिन्द्राय मंहना।।

🏺 9.38 एष उ स्य इति षळृचस्य सूक्तस्याऽऽङ्गिरसो रहूगणः- पवमान.स्सोमो- गायत्री।।

❀06.08.28 卐एष^ उ स्य^ वृषा रथो-ऽव्यो वारेभि.रर्षति। गच्छ.न्वाजं सहस्रिणम्।।

卐 एत.न्त्रितस्य योषणो- हरिं हिन्व.न्त्यद्रिभिः। इन्दु.मिन्द्राय पीतये।।

卐 एत.न्त्यं हरितो दश- मर्मृज्यन्ते अपस्युवः। याभि.र्मदाय शुम्भते।।

卐 एष^ स्य^ मानुषी.ष्वा- श्येनो न विक्षु सीदति। गच्छ.न्जारो न योषितम्।।

卐 एष^ स्य^ मद्यो रसो-ऽव चष्टे दिव.श्शिशुः। य^ इन्दु.र्वार.माऽविशत्।।

卐 एष^ स्य^ पीतये सुतो- हरि.रर्षति धर्णसिः। क्रन्द.न्योनि.मभि प्रियम्।।

9.39 आशुरर्षेति षळृचस्य सूक्तस्याऽङ्गिरसो बृहन्मतिः- पवमान.स्सोमो- गायत्री।।

❀06.08.29 卐आशु.रर्ष बृहन्मते- परि प्रियेण धाम्ना। यत्र देवा^ इति ब्रवन्न्।।

卐 परिष्कृण्व.न्ननिष्कृत.-ञ्जनाय यातय.न्निषः। वृष्टि.न्दिवः परि स्रव।।

卐 सुत^ एति पवित्र आ- त्विषि.न्दधान^ ओजसा। विचक्षाणो विरोचयन्न्।।

卐 अयं स^ यो दिव.स्परि- रघुयामा पवित्र आ। सिन्धो.रूर्मा व्यक्षरत्।।

卐 आविवास.न्परावतो- अथो~ अर्वावत.स्सुतः। इन्द्राय सिच्यते मधु।।

卐 समीचीना^ अनूषत- हरिं हिन्व.न्त्यद्रिभिः। योना.वृतस्य सीदत।।

9.40 पुनान इति षळृचस्य सूक्तस्याऽङ्गिरसो बृहन्मतिः- पवमान.स्सोमो- गायत्री।।

❀06.08.30 卐पुनानो अक्रमी.दभि- विश्वा^ मृधो विचर्षणिः। शुम्भन्ति विप्र.न्धीतिभिः।।

卐 आ योनि.मरुणो रुह.-द्गम.दिन्द्रँ वृषा सुतः। ध्रुवे सदसि सीदति।।

卐 नू नो रयिं महा.मिन्दो~-ऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम्।।

卐 विश्वा सोम पवमान- द्युम्ना.नीन्द.वा भर। विदा.स्सहस्रिणी. रिषः।।

卐 स^ नः पुनान^ आ भर- रयिं स्तोत्रे सुवीर्यम्। जरितु.र्वर्धया गिरः।।

卐 पुनान^ इन्द्.वा भर- सोम द्विबर्हसं रयिम्। वृष.न्निन्दो~ न^ उक्थ्यम्।।

9.41 प्र ये गाव इति षळृचस्य सूक्तस्य, काण्वो मेध्यातिथिः- पवमान.स्सोमो- गायत्री।।

❀06.08.31 卐प्र ये गावो न भूर्णय.-स्त्वेषा^ अयासो अक्रमुः। घ्नन्तः कृष्णा.मप त्वचम्।।

卐 सुवितस्य मनामहे-ऽति सेतु.न्दुराव्यम्। साह्वांसो दस्यु.मव्रतम्।।

卐 शृण्वे वृष्टेरिव स्वनः- पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि।।

卐 आ पवस्व मही.मिष.-ङ्गोम.दिन्दो~ हिरण्यवत्। अश्वाव.द्वाजव.त्सुतः।।

卐 स^ पवस्व विचर्षण- आ मही~ रोदसी~ पृण। उषा.स्सूर्यो न रश्मिभिः।।

卐 परि ण.श्शर्मयन्त्या- धारया सोम विश्वतः। सरा रसेव विष्टपम्।।

9.42 जनय.न्निति षळृचस्य सूक्तस्य, काण्वो मेध्यातिथिः- पवमान.स्सोमो- गायत्री।।

❀06.08.32 卐जनय.न्रोचना दिवो- जनय.न्नप्सु सूर्यम्। वसानो गा^ अपो हरिः।।

卐 एष^ प्रत्नेन मन्मना- देवो देवेभ्य.स्परि। धारया पवते सुतः।।

卐 वावृधानाय तूर्वये- पवन्ते वाजसातये। सोमा.स्सहस्रपाजसः।।

卐 दुहानः प्रत्न.मि.त्पयः- पवित्रे परिषिच्यते। क्रन्द.न्देवाँ अजीजनत्।।

卐 अभि विश्वानि वार्या-ऽभि देवा॒ ऋतावृधः। सोमः पुनानो अर्षति।।

卐 गोम.न्न.स्सोम वीरव.-दश्वाव.द्वाजव.त्सुतः। पवस्व बृहती.रिषः।।

9.43 यो अत्य^इवेति षळृचस्य सूक्तस्य, काण्वो मेध्यातिथिः-पवमान.स्सोमो- गायत्री।।

❀06.08.33 卐यो अत्य^इव मृज्यते- गोभि.र्मदाय हर्यतः। त.ङ्गीर्भि. र्वासयामसि।।

卐 त.न्नो विश्वा^ अवस्युवो- गिर.श्शुम्भन्ति पूर्वथा। इन्दु.मिन्द्राय पीतये।।

卐 पुनानो याति हर्यत.-स्सोमो गीर्भिः परिष्कृतः। विप्रस्य मेध्याऽतिथेः।।

卐 पवमान विदा^ रयि.-मस्मभ्यं सोम सुश्रियम्। इन्दो~ सहस्रवर्चसम्।।

卐 इन्दु.रत्यो न वाजसृ.-त्कनिक्रन्ति पवित्र आ। य.दक्षा.रति देवयुः।।

卐 पवस्व वाजसातये- विप्रस्य गृणतो वृधे। सोम रास्व सुवीर्यम्।।

।। इत्यष्टमाध्याय स्समाप्तः।।।। इति षष्ठाष्टकं समाप्तम्।।

❀सप्तमाष्टकम्

≈◊≈सप्तमाष्टके प्रथमाध्यायः (1-41)

🏺 9.44 प्र ण इन्द.विति षळृचस्य सूक्तस्याऽऽङ्गिरसोऽयास्यः- पवमान.स्सोमो- गायत्री।।

❀07.01.01 卐प्र ण^ इन्दो~ महे तन- ऊर्मि.न्न बिभ्र.दर्षसि। अभि देवा॰ अयास्यः।।

卐 मती जुष्टो धिया हित.-स्सोमो हिन्वे परावति। विप्रस्य धारया कविः।।

卐 अय.न्देवेषु जागृवि.-स्सुत^ एति पवित्र आ। सोमो याति विचर्षणिः।।

卐 स^ नः पवस्व वाजयु.-श्चक्राण.श्चारु.मध्वरम्। बर्हिष्मा॰ आ विवासति।।

卐 स^ नो भगाय वायवे- विप्रवीर.स्सदावृधः। सोमो देवे.ष्वा यमत्।।

卐 स^ नो अद्य वसुत्तये- क्रतुवि.द्गातुवित्तमः। वाज.ञ्जेषि श्रवो बृहत्।।

🏺 9.45 स^ पवस्वेति षळृचस्य सूक्तस्याऽऽङ्गिरसोऽयास्यः- पवमान.स्सोमो- गायत्री।।

❀07.01.02 卐स^ पवस्व मदाय क.-न्नृचक्षा^ देववीतये। इन्द.विन्द्राय पीतये।।

卐 स^ नो अर्षाऽभि दूत्य1(अ).-न्त्व.मिन्द्राय तोशसे। देवा.न्त्सखिभ्य^ आ वरम्।।

卐 उत त्वा.मरुणँ वय.-ङ्गोभि.रञ्ज्मो मदाय कम्। वि नो राये दुरो वृधि।।

卐 अ.त्यू पवित्र.मक्रमी.-द्वाजी धुर.न्न यामनि। इन्दु.र्देवेषु पत्यते।।

卐 स.मी सखायो अस्वर.-न्वने क्रीळन्त.मत्यविम्। इन्दु.न्नावा^ अनूषत।।

卐 तया पवस्व धारया- यया पीतो विचक्षसे। इन्दो~ स्तोत्रे सुवीर्यम्।।

⚱ 9.46 असृग्र. मिति षळृचस्य सूक्तस्याऽऽङ्गिरसोऽयास्यः- पवमान.स्सोमो- गायत्री।।

❀07.01.03 卐असृग्र.न्देववीतये-ऽत्यासः कृत्व्या^इव। क्षरन्तः पर्वतावृधः।।

卐 परिष्कृतास^ इन्दवो- योषेव पित्र्यावती। वायुं सोमा^ असृक्षत।।

卐 एते सोमास^ इन्दवः-प्रयस्वन्त.श्चमू~ सुताः। इन्द्रँ वर्धन्ति कर्मभिः।।

卐 आ धावता सुहस्त्य.-श्शुक्रा गृभ्णीत मन्थिना। गोभि.श्श्रीणीत मत्सरम्।।

卐 स^ पवस्व धनञ्जय- प्रयन्ता राधसो महः। अस्मभ्यं सोम गातुवित्।।

卐 एतं मृजन्ति मर्ज्यं- पवमान.न्दश क्षिपः। इन्द्राय मत्सरं मदम्।।

⚱ 9.47 अया सोम^ इति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः- पवमान.स्सोमो-गायत्री।।

❀07.01.04 卐अया सोम.स्सुकृत्यया- मह.श्चि.द.भ्यवर्धत। मन्दान^ उ.द्वृषायते।।

卐 कृतानी.दस्य कर्त्वा- चेतन्ते दस्युतर्हणा। ऋणा च धृष्णु.श्चयते।।

卐 आ.त्सोम^ इन्द्रियो रसो- वज्र.स्सहस्रसा^ भुवत्। उक्थँ य.दस्य जायते।।

卐 स्वय.ङ्कवि.र्विधर्तरि- विप्राय रत्न.मिच्छति। यदी मर्मृज्यते धियः।।

卐¤सिषासतू^ रयीणाँ- वाजे.ष्वर्वतामिव। भरेषु जिग्युषा.मसि।।

9.48 तन्त्वेति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः- पवमान.स्सोमो- गायत्री।।

❀07.01.05 卐त.न्त्वा नृम्णानि बिभ्रतं- सधस्थेषु महो दिवः। चारुं सुकृत्ययेमहे।।

卐 सँवृक्तधृष्णु.मुक्थ्यं- महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम्।।

卐 अत.स्त्वा रयि.मभि- राजानं सुक्रतो~ दिवः। सुपर्णो अव्यथि.र्भरत्।।

卐 विश्वस्मा इ.त्स्वर्दृशे- साधारणं रजस्तुरम्। गोपा.मृतस्य वि.र्भरत्।।

卐 अधा हिन्वान^ इन्द्रिय.-ञ्ज्यायो महित्व.मानशे। अभिष्टिकृ.द्विचर्षणिः।।

9.49 पवस्वेति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः- पवमान.स्सोमो- गायत्री।।

❀07.01.06 卐पवस्व वृष्टि.मा सु नो-ऽपा.मूर्मि.न्दिव.स्परि। अयक्ष्मा^ बृहती.रिषः।।

卐 तया पवस्व धारया- यया गाव^ इहाऽऽगमन्न्। जन्यास^ उप नो गृहम्।।

卐 घृतं पवस्व धारया- यज्ञेषु देववीतमः। अस्मभ्यँ वृष्टि.मा पव।।

卐 स^ न^ ऊर्जे व्य1(अ)व्ययं- पवित्र.न्धाव धारया। देवास.श्शृणव.न्हि कम्।।

卐 पवमानो ¤असिष्यद.-द्रक्षां.स्यपजङ्घनत्। प्रत्नव.द्रोचय.न्रुचः।।

9.50 उत्ते शुष्मास इति पञ्चर्चस्य सूक्तस्याऽङ्गिरस^ उचथ्यः- पवमान.स्सोमो- गायत्री।।

❀07.01.07 卐उ.त्ते शुष्मास^ ईरते- सिन्धो.रूर्मेरिव स्वनः। वाणस्य चोदया पविम्।।

卐 प्रसवे त उ.दीरते- तिस्रो वाचो मखस्युवः। य.दव्य एषि सानवि।।

卐 अव्यो वारे परि प्रियं- हरिं हिन्व.न्त्यद्रिभिः। पवमानं मधुश्चुतम्।।

卐 आ पवस्व मदिन्तम- पवित्र.न्धारया कवे। अर्कस्य योनि.मासदम्।।

卐 स^ पवस्व मदिन्तम- गोभि.रञ्जानो अक्तुभिः। इन्द.विन्द्राय पीतये।।

9.51 अध्वर्यो इति पञ्चर्चस्य सूक्तस्याऽङ्गिरस^ उचथ्यः- पवमान.स्सोमो- गायत्री।।

❀07.01.08 卐अध्वर्यो~ अद्रिभि.स्सुतं- सोमं पवित्र आ सृज। पुनी.हीन्द्राय पातवे।।

卐 दिवः पीयूष. मुत्तमं- सोम. मिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्।।

卐 तव त्य इन्दो~ अन्धसो- देवा^ मधो.र्व्यश्नते। पवमानस्य मरुतः।।

卐 त्वं हि सोम वर्धय.-न्त्सुतो मदाय भूर्णये। वृष.न्त्स्तोतार.मूतये।।

卐 अभ्यर्ष विचक्षण- पवित्र.न्धारया सुतः। अभि वाज.मुत श्रवः।।

9.52 परि द्युक्ष^ इति पञ्चर्चस्य सूक्तस्याऽऽङ्गिरस^ उचथ्यः- पवमान.स्सोमो- गायत्री।।

07.01.09 परि द्युक्ष.स्सनद्रयि.-र्भर.द्वाज.न्नो अन्धसा। सुवानो अर्ष पवित्र आ।।

तव प्रत्नेभि.रध्वभि.-रव्यो वारे परि प्रियः। सहस्रधारो या.त्तना।।

चरु.र्न य.स्त.मीङ्ख-येन्दो~ न दान.मीङ्खय। वधै.र्वधस्न.वीङ्खय।।

नि शुष्म.मिन्द.वेषां- पुरुहूत जनानाम्। यो अस्मा॰ आदिदेशति।।

शत.न्न^ इन्द~ ऊतिभि.-स्सहस्रँ वा शुचीनाम्। पवस्व मंहयद्रयिः।।

9.53 उत्ते शुष्मास^ इति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः- पवमान.स्सोमो- गायत्री।।

07.01.10 उ.त्ते शुष्मासो अस्थू^- रक्षो भिन्दन्तो अद्रिवः। नुदस्व याः परिस्पृधः।।

अया निजघ्नि.रोजसा- रथसङ्गे धने हिते। स्तवा अबिभ्युषा हृदा।।

अस्य व्रतानि नाऽऽधृषे- पवमानस्य दूढ्या। रुज य.स्त्वा पृतन्यति।।

तं हिन्वन्ति मदच्युतं- हरि.न्नदीषु वाजिनम्। इन्दु.मिन्द्राय मत्सरम्।।

9.54 अस्य प्रत्ना मिति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः- पवमान.स्सोमो- गायत्री।।

07.01.11 अस्य प्रत्ना.मनु द्युतं- शुक्र.न्दुदुहे अह्रयः। पय.स्सहस्रसा.मृषिम्।।

卐 अयं सूर्य^इ.वोपदृ.-गयं सरांसि धावति। सप्त प्रवत^ आ दिवम्।।
卐 अयँ विश्वानि तिष्ठति- पुनानो भुव.नोपरि। सोमो देवो न सूर्यः।।
卐 परि꠰णो देववीतये- वाजा॰ अर्षसि गोमतः। पुनान^ इन्द.विन्द्रयुः।।
9.55 यवँयव. मिति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः- पवमान.स्सोमो- गायत्री।।
❀07.01.12 卐यवँयव.न्नो अन्धसा- पुष्टंपुष्टं परि स्रव। सोम विश्वा च सौभगा।।
卐 इन्दो~ यथा तव स्तवो- यथा ते जात.मन्धसः। नि बर्हिषि प्रिये सदः।।
卐 उत नो गोवि.दश्ववि.-त्पवस्व सोमाऽन्धसा। मक्षूतमेभि.रहभिः।।
卐 यो जिनाति न जीयते- हन्ति शत्रु.मभीत्य। स^ पवस्व सहस्रजित्।।
9.56 परि सोम इति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः- पवमान.स्सोमो- गायत्री।।
❀07.01.13 卐परि सोम^ ऋतं बृह.-दाशुः पवित्रे अर्षति। विघ्न.न्रक्षांसि देवयुः।।
卐 य.त्सोमो वाज.मर्षति- शत न्धारा^ अपस्युवः। इन्द्रस्य सख्य.माविशन्न्।।
卐 अभि त्वा योषणो दश- जार.न्न कन्याऽनूषत। मृज्यसे सोम सातये।।
卐 त्व.मिन्द्राय विष्णवे- स्वादु.रिन्दो~ परि स्रव। नृ.न्त्स्तोतॄ.न्पाह्यंहसः।।

☸ 9.57 प्र ते धारा इति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः- पवमान.स्सोमो- गायत्री।।

❀07.01.14 卐प्र ते धारा^ असश्चतो- दिवो न यन्ति वृष्टयः। अच्छा वाजं सहस्रिणम्।।

卐 अभि प्रियाणि काव्या- विश्वा चक्षाणो अर्षति। हरि.स्तुञ्जान^ आयुधा।।

卐 स^ मर्मृजान^ आयुभि.-रिभो राजेव सुव्रतः। श्येनो न वंसु ¤षीदति।।

卐 स^ नो विश्वा दिवो व-सूतो~ पृथिव्या^ अधि। पुनान^ इन्द.वा भर।।

☸ 9.58 तर.त्स^ मन्दीति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः- पवमान.स्सोमो- गायत्री।।

❀07.01.15 卐तर.त्स^ मन्दी धावति- धारा सुतस्याऽन्धसः। तर.त्स^ मन्दी धावति।।

卐 उस्रा वेद वसूनां- मर्तस्य दे.व्यवसः। तर.त्स^ मन्दी धावति।।

卐 ध्वस्रयोः पुरु¤षन्त्यो.-रा सहस्राणि दद्महे। तर.त्स^ मन्दी धावति।।

卐 आ ययो.स्त्रिंशत.न्तना- सहस्राणि च दद्महे। तर.त्स^ मन्दी धावति।।

☸ 9.59 पवस्वेति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः- पवमान.स्सोमो- गायत्री।।

❀07.01.16 卐पवस्व गोजि.दश्वजि.-द्विश्वजि.त्सोम रण्यजित्। प्रजाव.द्रत्न.मा भर।।

卐 पवस्वाऽद्भ्यो अदाभ्यः- पव.स्वौषधीभ्यः। पवस्व धिषणाभ्यः।।

卐 त्वं सोम पवमानो- विश्वानि दुरिता तर। कवि.स्सीद नि बर्हिषि।।
卐 पवमान स्वर्विदो- जायमानोऽभवो महान्। इन्दो~ विश्वाँ अ.भी.दसि।।
9.60 प्र गायत्रेणेति चतुर्ऋचस्य सूक्तस्य, काश्यपोऽवत्सारः- पवमान.स्सोमो- गायत्री- तृतीया पुर^उष्णिक्।।
❀07.01.17 卐प्र गायत्रेण गायत- पवमानँ विचर्षणिम्। इन्दुं सहस्रचक्षसम्।।
卐 त.न्त्वा सहस्रचक्षस.-मथो~ सहस्रभर्णसम्। अति वार.मपाविषुः।।
卐 अति वारा.न्पवमानो ¤असिष्यद.-त्कलशाँ अभि धावति। इन्द्रस्य हा.र्द्याविशन्न्।।
卐 इन्द्रस्य सोम राधसे- शं पवस्व विचर्षणे। प्रजाव.द्रेत^ आ भर।।
9.61 अया वीतीति त्रिंश.दृचस्य सूक्तस्याऽऽङ्गिरसोऽमहीयुः- पवमान.स्सोमो- गायत्री।।
❀07.01.18 卐अया वीती परि स्रव- य.स्त^ इन्दो~ मदे.ष्वा। अवाह.न्नवती. र्नव।।
卐 पुर.स्सद्य^ इत्थाधिये- दिवोदासाय शम्बरम्। अध त्य.न्तुर्वशँ यदुम्।।
卐 परि ¤णो अश्व.मश्ववि.-द्गोम.दिन्दो~ हिरण्यवत्। क्षरा सहस्रिणी.रिषः।।
卐 पवमानस्य ते वयं- पवित्र.मभ्युन्दतः। सखित्व.मा वृणीमहे।।

卐 ये ते पवित्र.मूर्मयो-ऽभिक्षरन्ति धारया। तेभि.र्न.स्सोम मृळय।।

❀07.01.19 卐 स^ नः पुनान^ आ भर- रयिँ वीरवती.मिषम्। ईशान.स्सोम विश्वतः।।

卐 एत.मु त्य.न्दश क्षिपो- मृजन्ति सिन्धुमातरम्। स.मादित्येभि.रख्यत।।

卐 स.मिन्द्रे.णोत वायुना- सुत^ एति पवित्र आ। सं सूर्यस्य रश्मिभिः।।

卐 स^ नो भगाय वायवे- पूष्णे पवस्व मधुमान्। चारु.र्मित्रे वरुणे च।।

卐 उच्चा ते जात.मन्धसो- दिवि ष.द्भूम्या ददे। उग्रं शर्म महि श्रवः।। (सत्, भूमिः, आ, ददे)

❀07.01.20 卐एना विश्वा.न्यर्य^ आ- द्युम्नानि मानुषाणाम्। ¤सिषासन्तो वनामहे।।

卐 स^ न^ इन्द्राय यज्यवे- वरुणाय मरुद्भ्यः। वरिवोवि.त्परि स्रव।।

卐 उपो~ ¤षु जात.मप्तुर.-ङ्गोभि.र्भङ्गं परिष्कृतम्। इन्दु.न्देवा^ अयासिषुः।।

卐 त.मि.द्वर्धन्तु नो गिरो- वत्सं संशिश्वरीरिव। य^ इन्द्रस्य हृदंसनिः।।

卐 अर्षा ¤ण.स्सोम श.ङ्गवे- धुक्षस्व पिप्युषी.मिषम्। वर्धा समुद्र.मुक्थ्यम्।।

❀07.01.21 卐पवमानो अजीजन.-द्दिव.श्चित्र.न्न तन्यतुम्। ज्योति.र्वैश्वानरं बृहत्।।

卐 पवमानस्य ते रसो- मदो राज.न्नदुच्छुनः। वि वार.मव्य.मर्षति।।

卐 पवमान रस.स्तव- दक्षो वि राजति द्युमान्। ज्योति.र्विश्वं स्व.र्दृशे।।

卐 य.स्ते मदो वरेण्य.-स्तेना पवस्वाऽन्धसा। देवाऽवी.रघशंसहा।।

卐 जघ्नि.र्वृत्र.ममित्रियं- सस्नि.र्वाज.न्दिवेदिवे। गोषा^ उ अश्वसा^ असि।।

❀07.01.22 卐संमिश्लो अरुषो भव- सूपस्थाभि.र्न धेनुभिः। सीद.न्छ्येनो न योनि.मा।।

卐 स^ पवस्व य^ आवि.-थेन्द्रँ वृत्राय हन्तवे। वव्रिवांसं मही.रपः।।

卐 सुवीरासो वय.न्धना- जयेम सोम मीढ्वः। पुनानो वर्ध नो गिरः।।

卐 त्वोतास.स्तवाऽवसा- स्याम वन्वन्त^ आमुरः। सोम व्रतेषु जागृहि।।

卐 अपघ्न.न्पवते मृधो-ऽप सोमो अराव्णः। गच्छ.न्निन्द्रस्य निष्कृतम्।।

❀07.01.23 卐महो नो राय^ आ भर- पवमान जही मृधः। रास्वेन्दो~ वीरव.द्यशः।।

卐 न त्वा शत.ञ्चन ह्रुतो- राधो दित्सन्त.मा मिनन्न्। य.त्पुनानो मखस्यसे।।

卐 पव.स्वेन्दो~ वृषा सुतꣳ- कृधी नो यशसो जने। विश्वा^ अप द्विषो जहि।।

卐 अस्य ते सख्ये वय.-न्तवेन्दो~ द्युम्न उत्तमे। सासह्याम पृतन्यतः।।

卐 या ते भीमा.न्यायुधा- तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः।।

⚱ 9.62 एते असृग्रमिति त्रिंश.दृचस्य सूक्तस्य, भार्गवो जमदग्निः- पवमान.स्सोमो- गायत्री।।

❀07.01.24 卐एते असृग्र.मिन्दव.-स्तिरꣳ पवित्र.माशवः। विश्वा.न्यभि सौभगा।।

卐 विघ्नन्तो दुरिता पुरु- सुगा तोकाय वाजिनः। तना कृण्वन्तो अर्वते।।

卐 कृण्वन्तो वरिवो गवे-ऽभ्यर्षन्ति सुष्टुतिम्। इळा.मस्मभ्यं सँयतम्।।

卐 असा.व्यंशु. मंदाया-ऽप्सु दक्षो गिरिष्ठाः। श्येनो न योनि. माऽसदत्।।

卐 शुभ्र.मन्धो देववात.-मप्सु धूतो नृभि.स्सुतः। स्वदन्ति गावः पयोभिः।।

❀07.01.25 卐आ.दी.मश्व.न्न हेतारो-ऽशूशुभ.न्नमृताय। मध्वो रसं सधमादे।।

卐 या.स्ते धारा^ मधुश्चुतो-ऽसृग्र.मिन्द~ ऊतये। ताभिः पवित्र.माऽसदः।।

卐 सो अ.र्षेन्द्राय पीतये- तिरो रोमा.ण्यव्यया। सीद.न्योना वने.ष्वा।।

卐 त्व.मिन्दो~ परि स्रव- स्वादिष्ठो अङ्गिरोभ्यः। वरिवोवि.द्धृतं पयः।।

卐 अयँ विचर्षणि.र्हित:- पवमान.स्स^ चेतति। हिन्वान^ आप्यं बृहत्।।

❀07.01.26 卐एष^ वृषा वृषव्रतः- पवमानो अशस्तिहा। कर.द्वसूनि दाशुषे।।

卐 आ पवस्व सहस्रिणं- रयि.ङ्गोमन्त.मश्विनम्। पुरुश्चन्द्रं पुरुस्पृहम्।।

卐 एष^ स्य^ परिषिच्यते- मर्मृज्यमान^ आयुभिः। उरुगायः कविक्रतुः।।

卐 सहस्रोति.श्शतामघो- विमानो रजसः कविः। इन्द्राय पवते मदः।।

卐 गिरा जात^ इह स्तुत^- इन्दु.रिन्द्राय धीयते। वि.र्योना वसताविव।।

❀07.01.27 卐पवमान.स्सुतो नृभि.-स्सोमो वाज.मिवाऽसरत्। चमूषु शक्मना ऽऽसदम्।।

卐 त.न्त्रिपृष्ठे त्रिवन्धुरे- रथे युञ्जन्ति यातवे। ऋषीणां सप्त धीतिभिः।।

卐 तं सोतारो धनस्पृत.- माशुँ वाजाय यातवे। हरिं हिनोत वाजिनम्।।

卐 आविश.न्कलशं सुतो- विश्वा^ अर्ष.न्नभि श्रियः। शूरो न गोषु तिष्ठति।।
卐 आ त इन्दो~ मदाय कं- पयो दुह.न्त्यायवः। देवा^ देवेभ्यो मधु।।
❀07.01.28 卐आ न.स्सोमं पवित्र आ- सृजता मधुमत्तमम्। देवेभ्यो देवश्रुत्तमम्।।
卐 एते सोमा^ असृक्षत- गृणाना.श्श्रवसे महे। मदिन्तमस्य धारया।।
卐 अभि गव्यानि वीतये- नृम्णा पुनानो अर्षसि। सनद्वाजः परि स्रव।।
卐 उत नो गोमती. रिषो- विश्वा^ अर्ष परिष्टुभः। गृणानो जमदग्निना।।
卐 पवस्व वाचो अग्रिय.-स्सोम चित्राभि.रूतिभिः। अभि विश्वानि काव्या।।
❀07.01.29 卐त्वं समुद्रिया^ अपो-ऽग्रियो वाच^ ईरयन्न्। पवस्व विश्वमेजय।।
卐 तुभ्येमा भुवना कवे- महिम्ने सोम तस्थिरे। तुभ्य.मर्षन्ति सिन्धवः।।
卐 प्र ते दिवो न वृष्टयो- धारा^ य.न्त्यसश्चतः। अभि शुक्रा.मुपस्तिरम्।।
卐 इन्द्रायेन्दुं पुनीत-नोग्र. न्दक्षाय साधनम्। ईशानँ वीतिराधसम्।।
卐 पवमान^ ऋतः कवि.-स्सोमः पवित्र.माऽसदत्। दध.त्स्तोत्रे सुवीर्यम्।।
9.63 आ पवस्वेति त्रिंश.दृचस्य सूक्तस्य, काश्यपो निध्रुविः- पवमान.स्सोमो- गायत्री।।
❀07.01.30 卐आ पवस्व सहस्रिणं- रयिं सोम सुवीर्यम्। अस्मे~ श्रवांसि धारय।।
卐 इष.मूर्जं.ञ्च पिन्वस- इन्द्राय मत्सरिन्तमः। चमू.ष्वा नि षीदसि।।

卐 सुत^ इन्द्राय विष्णवे- सोम꠸ कलशे अक्षरत्। मधुमा꠸ अस्तु वायवे।।

卐 एते असृग्र.माशवो-ऽति ह्वरांसि बभ्रवः। सोमा^ ऋतस्य धारया।।

卐 इन्द्रँ वर्धन्तो अप्तुर꠸- कृण्वन्तो विश्व.मार्यम्। अपघ्नन्तो अराव्णः।।

❀07.01.31 卐सुता^ अनु स्व.मा रजो-ऽभ्यर्षन्ति बभ्रवः। इन्द्र.ङ्गच्छन्त^ इन्दवः।।

卐 अया पवस्व धारया- यया सूर्य.मरोचयः। हिन्वानो मानुषी.रपः।।

卐 अयुक्त सूर^ एतशं- पवमानो मना.वधि। अन्तरिक्षेण यातवे।।

卐 उत त्या^ हरितो दश- सूरो अयुक्त यातवे। इन्दु.रिन्द्र^ इति ब्रुवन्न्।।

卐 प.रीतो वायवे सुत.-ङ्गिर^ इन्द्राय मत्सरम्। अव्यो वारेषु सिञ्चत।।

❀07.01.32 卐पवमान विदा^ रयि.-मस्मभ्यं सोम ꣲदुष्टरम्। यो ꣲदूणाशो वनुष्यता।।

卐 अ.भ्यर्ष सहस्रिणं- रयि.ङ्गोमन्त.मश्विनम्। अभि वाज.मुत श्रवः।।

卐 सोमो देवो न सूर्यो-ऽद्रिभि꠸ पवते सुतः। दधान꠸ कलशे रसम्।।

卐 एते धामा.न्यार्या- शुक्रा^ ऋतस्य धारया। वाज.ङ्गोमन्त.मक्षरन्न्।।

卐 सुता^ इन्द्राय वज्रिणे- सोमासो दध्याशिरः। पवित्र.मत्यक्षरन्न्।।

❀07.01.33 卐प्र सोम मधुमत्तमो- राये अर्ष पवित्र आ। मदो यो देववीतमः।।

卐 त.मी मृज.न्त्यायवो- हरि.न्नदीषु वाजिनम्। इन्दु.मिन्द्राय मत्सरम्।।

卐 आ पवस्व हिरण्यव.-दश्वाव.त्सोम वीरवत्। वाज.ङ्गोमन्त.मा भर।।

卐 परि वाजे न वाजयु.-मव्यो वारेषु सिञ्चत। इन्द्राय मधुमत्तमम्।।

卐 कविं मृजन्ति मर्ज्यं.-न्धीभि.र्विप्रा^ अवस्यवः। वृषा कनिक्र.दर्षति।।

❀07.01.34 卐वृषण.न्धीभि.रप्तुरं- सोम.मृतस्य धारया। मती विप्रा.स्स.मस्वरन्न्।।

卐 पवस्व देवा.ऽऽयुष.-गिन्द्र.ङ्गच्छतु ते मदः। वायु.मा रोह धर्मणा।।

卐 पवमान नि तोशसे- रयिं सोम श्रवाय्यम्। प्रिय.स्समुद्र.मा विश।।

卐 अपघ्न.न्पवसे मृधः- क्रतुवि.त्सोम मत्सरः। नुदस्वाऽदेवयु.ञ्जनम्।।

卐 पवमाना^ असृक्षत- सोमा.श्शुक्रास^ इन्दवः। अभि विश्वानि काव्या।।

❀07.01.35 卐पवमानास^ आशव.-श्शुभ्रा^ असृग्र.मिन्दवः। घ्नन्तो विश्वा^ अप द्विषः।।

卐 पवमाना^ दिव.स्प-र्यन्तरिक्षा.दसृक्षत। पृथिव्या^ अधि सानवि।।

卐 पुनान.स्सोम धार.-येन्दो~ विश्वा^ अप स्त्रिधः। जहि रक्षांसि सुक्रतो~।।

卐 अपघ्न.न्त्सोम रक्षसो-ऽभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्म.मुत्तमम्।।

卐 अस्मे~ वसूनि धारय- सोम दिव्यानि पार्थिवा। इन्दो~ विश्वानि वार्या।।

9.64 वृषा सोमेति त्रिंश.दृचस्य सूक्तस्य, मारीचः कश्यपः- पवमान.स्सोमो- गायत्री।।

❀07.01.36 卐वृषा सोम द्युमा९ असि- वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे।।

卐 वृष्ण.स्ते वृष्ण्यं शवो- वृषा वनँ वृषा मदः। सत्यँ वृष.न्वृषे.दसि।।

卐 अश्वो न चक्रदो वृषा- स.ङ्गा^ इन्दो~ स.मर्वतः। वि नो राये दुरो वृधि।।

卐 असृक्षत प्र वाजिनो- गव्या सोमासो अश्वया। शुक्रासो वीरयाऽऽशवः।।

卐 शुम्भमाना^ ऋतायुभि.-र्मृज्यमाना^ गभस्त्योः। पवन्ते वारे अव्यये।।

❀07.01.37 卐ते विश्वा दाशुषे वसु- सोमा^ दिव्यानि पार्थिवा। पवन्ता. माऽन्तरिक्ष्या।।

卐 पवमानस्य विश्ववि.-त्प्र ते सर्गा^ असृक्षत। सूर्यस्येव न रश्मयः।।

卐 केतु.ङ्कृण्व.न्दिव.स्परि- विश्वा रूपाऽभ्यर्षसि। समुद्र.स्सोम पिन्वसे।।

卐 हिन्वानो वाच.मिष्यसि- पवमान विधर्मणि। अक्रा.न्देवो न सूर्यः।।

卐 इन्दुः पविष्ट चेतनः- प्रियः कवीनां मती। सृज.दश्वं रथीरिव।।

❀07.01.38 卐ऊर्मि.र्य.स्ते पवित्र आ- देवावीः पर्यक्षरत्। सीद.न्नृतस्य योनि.मा।।

卐 स^ नो अर्ष पवित्र आ- मदो यो देववीतमः। इन्द.विन्द्राय पीतये।।

卐 इषे पवस्व धारया- मृज्यमानो मनीषिभिः। इन्दो~ रुचाऽभि गा^ इहि।।

卐 पुनानो वरिव.स्कृ.-ध्यूर्ज.ञ्जनाय गिर्वणः। हरे सृजान^ आशिरम्।।

卐 पुनानो देववीतय- इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभि.र्यतः।।

❀07.01.39 卐प्र हिन्वानास^ इन्दवो-ऽच्छा समुद्र.माशवः। धिया जूता^ असृक्षत।।

卐 मर्मृजानास^ आयवो- वृथा समुद्र.मिन्दवः। अग्म.न्नृतस्य योनि.मा।।

卐 परि ष्णो या.ह्यस्मयु.-र्विश्वा वसू.न्योजसा। पाहि न.श्शर्म वीरवत्।।

卐 मिमाति वह्नि.रेतश॰- पदं युजान^ ऋक्वभिः। प्र य.त्समुद्र आहितः।।

卐 आ य.द्योनिं हिरण्ययं.-माशुर् ऋतस्य सीदति। जहा.त्यप्रचेतसः।।

❀07.01.40 卐अभि वेना^ अनूष.-तेयक्षन्ति प्रचेतसः। मज्ज.न्त्यविचेतसः।।

卐 इन्द्रायेन्दो~ मरुत्वते- पवस्व मधुमत्तमः। ऋतस्य योनि.मासदम्।।

卐 त.न्त्वा विप्रा^ वचोविद॰- परि¤ष्कृण्वन्ति वेधसः। स.न्त्वा मृज.न्त्यायवः।।

卐 रस.न्ते मित्रो अर्यमा- पिबन्ति वरुण॰ कवे। पवमानस्य मरुतः।।

卐 त्वं सोम विपश्चितं- पुनानो वाच.मिष्यसि। इन्दो~ सहस्रभर्णसम्।।

❀07.01.41 卐उतो~ सहस्रभर्णसँ- वाचं सोम मखस्युवम्। पुनान^ इन्द.वा भर।।

卐 पुनान^ इन्द.वेषां- पुरुहूत जनानाम्। प्रिय.स्समुद्र.मा विश।।

卐 दविद्युतत्या रुचा- परि¤ष्टोभन्त्या कृपा। सोमा.श्शुक्रा^ गवाशिरः।।

卐 हिन्वानो हेतृभि.र्यत^- आ वाजँ वा.ज्यक्रमीत्। सीदन्तो वनुषो यथा।।

卐 ऋध.क्सोम स्वस्तये- सञ्जग्मानो दिव॰ कविः। पवस्व सूर्यो दृशे।।

इति प्रथमाध्याय स्समाप्तः।।

## सप्तमाष्टके द्वितीयाध्यायः (वर्गाः 1-33)

9.65 हिन्वन्तीति त्रिंश.दृचस्य सूक्तस्य, वारुणि.र्भृगुः- पवमान.स्सोमो-गायत्री-(अत्र भार्गवो जमदग्निः पाक्षिकः)।।

❀07.02.01 卐हिन्वन्ति सूर.मुस्त्रय.-स्स्वसारो जामय.स्पतिम्। महा.मिन्दुं महीयुवः।

卐 पवमान रुचारुचा- देवो देवेभ्य.स्परि। विश्वा वसू.न्या विश।।

卐 आ पवमान सु॒ष्टुतिँ- वृष्टि.न्देवेभ्यो दुवः। इषे पवस्व सँयतम्।।

卐 वृषा ह्यसि भानुना- द्युमन्त.न्त्वा हवामहे। पवमान स्वाध्यः।।

卐 आ पवस्व सुवीर्यं- मन्दमान.स्स्वायुध। इहो~ ॒ष्विन्द.वा गहि।।

❀07.02.02 卐य.दद्भिः परि॒षिच्यसे- मृज्यमानो गभस्त्योः। द्रुणा सधस्थ. मश्नुषे।।

卐 प्र सोमाय व्यश्ववत्.-त्पवमानाय गायत। महे सहस्रचक्षसे।।

卐 यस्य वर्णं मधुश्चुतं- हरिं हिन्व.न्त्यद्रिभिः। इन्दु.मिन्द्राय पीतये।।

卐 तस्य ते वाजिनो वयँ- विश्वा धनानि जिग्युषः। सखित्व.मा वृणीमहे।।

卐 वृषा पवस्व धारया- मरुत्वते च मत्सरः। विश्वा दधान^ ओजसा।।

❀07.02.03 卐त.न्त्वा धर्तार.मोण्यो3(ओ)ः-पवमान स्वर्दृशम्। हिन्वे वाजेषु वाजिनम्।।

卐 अया चित्तो विपाऽनया- हरिः पवस्व धारया। युजँ वाजेषु चोदय।।

卐 आ न^ इन्दो~ मही. मिषं- पवस्व विश्वदर्शतः। अस्मभ्यं सोम गातुवित्।।

卐 आ कलशा^ अनूष.-तेन्दो~ धाराभि.रोजसा। एन्द्रस्य पीतये विश।।

卐 यस्य ते मद्यं रस.-न्तीव्र.न्दुह.न्त्यद्रिभिः। स^ पवस्वाऽभिमातिहा।।

❀07.02.04 卐राजा मेधाभि.रीयते- पवमानो मना.वधि। अन्तरिक्षेण यातवे।।

卐 आ न^ इन्दो~ शतग्विन.-ङ्गवां पोषं स्वश्व्यम्। वहा भगत्ति.मूतये।।

卐 आ न.स्सोम सहो जुवो- रूप.न्न वर्चसे भर। ¤सुष्वाणो देववीतये।।

卐 अर्षा सोम द्युमत्तमो-ऽभि द्रोणानि रोरुवत्। सीद.न्छ्येनो न योनि.मा।।

卐 अप्सा^ इन्द्राय वायवे- वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे।।

❀07.02.05 卐इष.न्तोकाय नो दध.-दस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम्।।

卐 ये सोमास¤ परावति- ये अर्वावति सुन्विरे। ये वाऽद.श्शर्यणावति।।

卐 य आर्जीकेषु कृत्वसु- ये मध्ये पस्त्यानाम्। ये वा जनेषु पञ्चसु।।

卐 ते नो वृष्टि.न्दिव.स्परि- पवन्ता.मा सुवीर्यम्। सुवाना^ देवास^ इन्दवः।।

卐 पवते हर्यतो हरि.-र्गृणानो जमदग्निना। हिन्वानो गो.रधि त्वचि।।

❀07.02.06 卐प्र शुक्रासो वयोजुवो- हिन्वानासो न सप्तयः। श्रीणाना^ अप्सु मृञ्जत।।

卐 त.न्त्वा सुते.ष्वाभुवो- हिन्विरे देवतातये। स^ पवस्वाऽनया रुचा।।

卐 आ ते दक्षं मयोभुवं- वह्नि.मद्या वृणीमहे। पान्त.मा पुरुस्पृहम्।।

卐 आ मन्द्र.मा वरेण्य.-मा विप्र.मा मनीषिणम्। पान्त.मा पुरुस्पृहम्।।

卐 आ रयि.मा सुचेतुन.-मा सुक्रतो~ तनू.ष्वा। पान्त.मा पुरुस्पृहम्।।

9.66 पवस्वेति त्रिंश.दृचस्य सूक्तस्य, शतं वैखानसाः- पवमान.स्सोमो- एकोनविंश्यादि तिसृणा.मग्निः- पवमानो-गाय.त्र्यष्टादश्यनुष्टुप्- (शतं वैखानसा एते स्वायम्भुवाः, अत एषा.ङ्गोत्रं नास्ति एवमग्रेऽपि नारायणादय ऊह्याः)।।

❀07.02.07 卐पवस्व विश्वचर्षणे-ऽभि विश्वानि काव्या। सखा सखिभ्य^ ईड्यः।।

卐 ताभ्याँ विश्वस्य राजसि- ये~ पवमान धामनी~। प्रतीची~ सोम तस्थतुः।।

卐 परि धामानि यानि ते- त्वं सोमाऽसि विश्वतः। पवमान^ ऋतुभि॰ कवे।।

卐 पवस्व जनय.न्निषो-ऽभि विश्वानि वार्या। सखा सखिभ्य^ ऊतये।।

卐 तव शुक्रासो अर्चयो- दिव.स्पृष्ठे वि तन्वते। पवित्रं सोम धामभिः।।

❀07.02.08 卐तवेमे सप्त सिन्धव॰- प्रशिषं सोम सिस्रते। तुभ्य.न्धावन्ति धेनवः।।

卐 प्र सोम याहि धारया- सुत^ इन्द्राय मत्सरः। दधानो अक्षिति श्रवः।।

卐 स.मु त्वा धीभि.रस्वर.-न्हिन्वती.स्सप्त जामयः। विप्र.माजा विवस्वतः।।

卐 मृजन्ति त्वा समग्रुवो-ऽव्ये जीरा.वधि॰ष्वणि। रेभो य.दज्यसे वने।।

卐 पवमानस्य ते कवे- वाजि.न्त्सर्गा^ असृक्षत। अर्वन्तो न श्रवस्यवः।।

❀07.02.09 卐अच्छा कोशं मधुश्चुत.-मसृग्रं वारे अव्यये। अवावशन्त धीतयः।।

卐 अच्छा समुद्र.मिन्दवो-ऽस्त.ङ्गावो न धेनवः। अग्म.न्नृतस्य योनि.मा।।

卐 प्र ण^ इन्दो~ महे रण- आपो अर्षन्ति सिन्धवः। य.द्गोभि.र्वासयिष्यसे।।

卐 अस्य ते सख्ये वय.-मियक्षन्त.स्त्वोतयः। इन्दो~ सखित्व.मुश्मसि।।

卐 आ पवस्व गविष्टये- महे सोम नृचक्षसे। एन्द्रस्य जठरे विश।।

❀07.02.10 卐महा२ असि सोम ज्येष्ठ^- उग्राणा.मिन्द ओजिष्ठः। युध्वा स.न्छश्व.ज्जिगेथ।।

卐 य^ उग्रेभ्य.श्चि.दोजीया-न्छूरेभ्य.श्चि.च्छूरतरः। भूरिदाभ्य.श्चि.न्मंहीयान्।।

卐 त्वं सोम सूर^ एष.-स्तोकस्य साता तनूनाम्। वृणीमहे सख्याय- वृणीमहे युज्याय।।

卐 अग्न आयूंषि पवस- आ सुवोर्ज.मिष.ञ्च नः। आरे बाधस्व दुच्छुनाम्।।

卐 अग्निर् ऋषिः पवमानः- पाञ्चजन्यः पुरोहितः। त.मीमहे महागयम्।।

❀07.02.11 卐अग्ने पवस्व स्वपा^- अस्मे~ वर्च.स्सुवीर्यम्। दध.द्रयिं मयि पोषम्।।

卐 पवमानो अति स्रिधो-ऽभ्यर्षति सुष्टुतिम्। सूरो न विश्वदर्शतः।।

卐 स^ मर्मृजान^ आयुभिः- प्रयस्वा.न्प्रयसे हितः। इन्दु.रत्यो विचक्षणः।।

卐 पवमान^ ऋतं बृह.-च्छुक्र.ञ्ज्योति.रजीजनत्। कृष्णा तमांसि जङ्घनत्।।

卐 पवमानस्य जङ्घ्नतो- हरे.श्चन्द्रा^ असृक्षत। जीरा^ अजिरशोचिषः।।

❀07.02.12 卐पवमानो रथीतम.-श्शुभ्रेभि.श्शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः।।

卐 पवमानो व्यश्नव.-द्रश्मिभि.र्वाजसातमः। दध.त्स्तोत्रे सुवीर्यम्।।

卐 प्र सुवान^ इन्दु.रक्षाः'- पवित्र.म.त्यव्ययम्। पुनान^ इन्दु.रिन्द्र.मा।।

卐 एष^ सोमो अधि त्वचि- गवा.ङ्क्रीळ.त्यद्रिभिः। इन्द्रं मदाय जोहुवत्।।

卐 यस्य ते द्युम्नव.त्पयः- पवमानाऽऽभृत.न्दिवः। तेन नो मृळ जीवसे।।

चतुर्थेनुवाकेऽष्टादशसूक्तानि

9.67 त्वं सोमाऽसीति द्वात्रिंश.दृचस्य सूक्तस्या-ऽऽद्यानां सप्तानां तृचानां भरद्वाज कश्यप गोतमाऽत्रि विश्वामित्र जमदग्नि वसिष्ठा^ ऋषयः- शिष्टाना.माङ्गिरसः पवित्र^ ऋषिः (अत्र वसिष्ठो वा पवित्रवसिष्ठौ वेति विपक्षौ) पवमान.स्सोमो देवता- दशम्यादि तिसृणां पूषा वा- यत्ते पवित्र. मित्यादि पञ्चाना.मग्निः- अन्त्ययो.र्द्वयोः पावमान्यधेता- गायत्री- षोडश्याद्या. स्तिस्रो द्विपदा^ गायत्र्यः- त्रिंशी पुर^उष्णिक्- सप्तविंश्येकत्रिंशी द्वात्रिंश्योऽनुष्टुभः (पञ्चविंश्यादि तिसृणां क्रमा.त्सविताऽग्निसवितारौ विश्वे देवा इति, देवता अग्निना सह विकल्पन्ते)।।

❀07.02.13 卐त्वं सोमाऽसि धारयु.-र्मन्द्र^ ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः।।

卐 त्वं सुतो नृमादनो- दधन्वा.न्मत्सरिन्तमः। इन्द्राय सूरि.रन्धसा।।

卐 त्वं ॒सुष्वाणो अद्रिभि.-रभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्म.मुत्तमम्।।

卐 इन्दु.र्हिन्वानो अर्षति- तिरो वारा.ण्यव्यया। हरि.र्वाज.मचिक्रदत्।।

卐 इन्दो~ व्यव्य.मर्षसि- वि श्रवांसि वि सौभगा। वि वाजा.न्त्सोम गोमतः।।

❀07.02.14 卐आ न^ इन्दो~ शतग्विनं- रयि.ङ्गोमन्त.मश्विनम्। भरा सोम सहस्रिणम्।।

卐 पवमानास^ इन्दव.-स्तिर॰ पवित्र.माशवः। इन्द्रँ यामेभि.राशत।।

卐 ककुह. स्सोम्यो रस^- इन्दु.रिन्द्राय पूर्व्यः। आयु॰ पवत आयवे।।

卐 हिन्वन्ति सूर.मुस्रय॰- पवमानं मधुश्चुतम्। अभि गिरा स.मस्वरन्न्।।

卐 अविता नो अजाऽश्व॰- पूषा यामनियामनि। आ भक्ष.त्कन्यासु नः।।

❀07.02.15 卐अयं सोम॰ कपर्दिने- घृत.न्न पवते मधु। आ भक्ष.त्कन्यासु नः।।

卐 अय.न्त आघृणे सुतो- घृत.न्न पवते शुचि। आ भक्ष.त्कन्यासु नः।।

卐 वाचो जन्तु॰ कवीनां- पवस्व सोम धारया। देवेषु रत्नधा^ असि।।

卐 आ कलशेषु धावति- श्येनो वर्म वि गाहते। अभि द्रोणा कनिक्रदत्।।

卐 परि प्र सोम ते रसो-ऽसर्जि कलशे सुतः। श्येनो न तक्तो अर्षति।।

❀07.02.16 卐पवस्व सोम मन्दय.-न्निन्द्राय मधुमत्तमः।।

卐 असृग्र.न्देववीतये- वाजयन्तो रथा^इव।।

卐 ते सुतासो मदिन्तमा.-श्शुक्रा^ वायु.मसृक्षत।।

卐 ग्रावणा तुन्नो अभिष्टुतः- पवित्रं सोम गच्छसि। दध.त्स्तोत्रे सुवीर्यम्।।

卐 एष^ तुन्नो अभिष्टुतः- पवित्र. मति गाहते। रक्षोहा वार.मव्ययम्।।

❀07.02.17 卐य.दन्ति य.च्च दूरके- भयँ विन्दति मा.मिह। पवमान वि त.ज्जहि।।

卐 पवमान.स्सो अद्य नः- पवित्रेण विचर्षणिः। यः पोता स^ पुनातु नः।।

卐 य.त्ते पवित्र मर्चि.-ष्यग्ने वितत.मन्त.रा। ब्रह्म तेन पुनीहि नः।।

卐 य.त्ते पवित्र. मर्चिव.-दग्ने तेन पुनीहि नः। ब्रह्मसवैः पुनीहि नः।।

卐 उभाभ्या.न्देव सवितः'- पवित्रेण सवेन च। मां पुनीहि विश्वतः।।

❀07.02.18 卐त्रिभि.ष्ट्व. न्देव सवित.-र्वर्षिष्ठै.स्सोम धामभिः। अग्ने दक्षैः पुनीहि नः।।

卐 पुनन्तु मा.न्देवजनाः- पुनन्तु वसवो धिया। विश्वे देवाः पुनीत मा- जातवेदः पुनीहि मा।।

卐 प्र प्यायस्व प्र स्यन्दस्व- सोम विश्वेभि.रंशुभिः। देवेभ्य^ उत्तमं हविः।।

卐 उप प्रियं पनिप्नतँ- युवान.माहुतीवृधम्। अगन्म बिभ्रतो नमः।।

卐 अलाय्यस्य परशु.र्ननाश- त.मा पवस्व देव सोम। आखु.ञ्चि.देव देव सोम।।

卐 यः पावमानी.रध्ये.-त्यृषिभि.स्सम्भृतं रसम्। सर्वं स^ पूत. मश्नाति- स्वदितं मातरिश्वना।।

卐 पावमानी.र्यो अध्ये.-त्यृषिभि.स्सम्भृतं रसम्। तस्मै सरस्वती दुहे- क्षीरं सर्पि.र्मधूदकम्।

✡।। अथ परिशिष्टम्।।

卐 पावमानी. स्स्वस्त्ययनी.-स्सुदुघा हि घृतश्चुतः। ऋषिभि. स्सम्भृतो रसो- ब्राह्मणे.ष्वमृतं हितम्।।

卐 पावमानी. र्दिशन्तु न^- इमँ लोक. मथो~ अमुम्। कामा. न्त्समर्धयन्तु नो-देवी. र्दैवै. स्समाहिताः।।

卐 येन देवाः पवित्रेणा-ऽऽत्मानं पुनते सदा। तेन सहस्रधारेण- पावमान्यः पुनन्तु माम्।।

卐 प्राजापत्यं पवित्रं- शतोद्यामं हिरण्मयम्। तेन ब्रह्मविदो वयं- पूतं ब्रह्म पुनीमहे।।

卐 इन्द्र. स्सुनीती सह मा पुनातु- सोम. स्स्वस्त्या वरुण. स्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा- जातवेदा मूर्जयन्त्या पुनातु।।

卐 ऋषय.स्तु तप.स्तेपु.-स्सर्वे स्वर्गजिगीषवः। तपस.स्तपसोऽग्रिय.न्तु-पावमानीर् ऋचोऽब्रुवन्।।

卐 य.न्मे गर्भे वसतः पाप. मुग्रँ- य.ज्जायमानस्य च किञ्चि.दन्यत्। जातस्य च य.च्चाऽपि च वर्धतो मे- तत्पावमानीभि. रहं पुनामि।।

卐 मातापित्रो.र्य.न्न कृतँ वचो मे- य.त्स्थावर.ञ्जङ्गम. माबभूव। विश्वस्य तत्प्रहृषितँ वचो मे- तत्पावमानीभि. रहं पुनामि।।

卐 गोघ्ना. त्तस्करत्वा-त्स्त्रीवधा. द्यच्च किल्बिषम्। पापकञ्च चरणेभ्य.-स्तत्पावमानीभि. रहं पुनामि।।

卐 ब्रह्मवधा. त्सुरापाना.त्स्वर्णस्तेया-द्वृषलि गमन मैथुन सङ्गमात्। गुरो.र्दाराऽधिगमना.च्च- तत्पावमानीभि. रहं पुनामि।।

卐 बालघ्ना. न्मातृपितृवधा. द्भूमितस्करा-त्सर्ववर्ण गमनमैथुन सङ्गमात्। पापेभ्यश्च प्रतिग्रहा.-त्सद्यः प्रहरति सर्वदुष्कृत-न्तत्पावमानीभि. रहं पुनामि।।

卐 क्रयविक्रया. द्योनिदोषा.-द्भक्षा. द्भोज्या. त्प्रतिग्रहात्। असंभोजना.च्चाऽपि नृशंस.-न्तत्पावमानीभि. रहं पुनामि।।

卐 दुर्यष्ट. न्दुरधीतं पापं- यच्चाज्ञानतोऽकृतम्। अयाजिताश्चाऽसँयाज्या.-स्तत्पावमानीभि. रहं पुनामि।।

卐 अमन्त्र.मन्नँ यत्किञ्चि.-द्धूयते च हुताशने। सँवत्सरकृतं पाप-.न्तत्पावमानीभि. रहं पुनामि।।

卐 ऋतस्य योनयोऽमृतस्य धाम- विश्वा देवेभ्यः पुण्यगन्धाः। ता^ न^ आपः प्र वहन्तु पापं- शुद्धा^ गच्छामि सुकृता.मु लोक- न्तत्पावमानीभि. रहं पुनामि।।

卐 पावमानी. स्स्वस्त्ययनी.-र्याभि. र्गच्छति नान्दनम्। पुण्यांश्च भक्षा. न्भक्षय-त्यमृतत्व.ञ्च गच्छति।।

卐 पावमानीः पितृ.न्देवा.-न्ध्याये. द्यश्च सरस्वतीम्। पितृं.स्तस्योप वर्तेत- क्षीरं सर्पि. र्मधूदकम्।।

卐 पावमानं परं ब्रह्म- शुक्र.ज्ज्योति. स्सनातनम्। ऋषीं.स्तस्योप तिष्ठेत- क्षीरं सर्पि. र्म.धूदकम्।।

卐 पावमानं परं ब्रह्म- ये पठन्ति मनीषिणः। सप्तजन्म भवे.द्विप्रो- धनाढ्यो वेदपारगः।।

卐 दशोत्तरा.ण्यृचां.श्चैव- पावमानी. श्शतानि षट्। एतज्जुह्व.न्जपे. न्मन्त्र- ङ्घोरमृत्युभयं हरेत्।।

卐 एत.त्पुण्यं पापहरं- रोग.मृत्यु.भयापहम्। पठतां. श्शृण्वता.ञ्चैव- ददाति परमा.ङ्गतिम्।।।। इति परिशिष्टम्।। मण्डलादितः इतः पर्यन्तं पवमान मन्त्राः।।

# पूयमान मन्त्राः

इतःपरं, आ मण्डल परिसमाप्तेः पूयमान मन्त्राः।।

9.70 प्र देवमिति दशर्चस्य सूक्तस्य, भालन्दनो वत्सप्रिः- पवमान.स्सोमो-जग-त्यन्त्या त्रिष्टुप्।।

❀07.02.19 卐प्र देव.मच्छा मधुमन्त^ इन्दवो-ऽसिष्यदन्त गाव^ आ न धेनवः। बर्हिषदो वचनावन्त^ ऊधभिः- परिस्रुत.मुस्रिया^ निर्णिज.न्धिरे।।

卐 स^ रोरुव.दभि पूर्वा^ अचिक्रद.-दुपाऽरुह.श्श्रथय.न्त्स्वादते हरिः।
तिरः पवित्रं परिय.न्नुरु ज्रयो- नि शर्याणि दधते देव^ आ वरम्।।
卐 वि यो ममे यम्या सँयती~ मद.-स्साकँवृधा पयसा पिन्व.दक्षिता। मही~ अपारे~ रजसी~ विवेविद.-दभिव्रज.न्नक्षितं पाज^ आ ददे।।
卐 स^ मातरा विचर.न्वाजय.न्नपः- प्र मेधिर.स्स्वधया पिन्वते पदम्। अंशु.र्यवेन पिपिशे यतो नृभि.-स्स.ञ्जामिभि.र्नसते रक्षते शिरः।।
卐 स.न्दक्षेण मनसा जायते कविर्- ऋतस्य गर्भो निहितो यमा परः। यूना ह सन्ता प्रथमँ वि जज्ञतु.-र्गुहा हित.ञ्जनिम नेम.मुद्यतम्।।
❀07.02.20 卐मन्द्रस्य रूपँ विविदु.र्मनीषिण.-श्श्येनो य.दन्धो अभर.त्परावतः। तं मर्जयन्त सुवृध.न्नदी.ष्वाः- उशन्त.मंशुं परियन्त.मृग्मियम्।।
卐 त्वां मृजन्ति दश योषण.स्सुतं- सोम ऋषिभि.र्मतिभि.र्धीतिभि.र्हितम्। अव्यो वारेभि.रुत देवहूतिभि.-र्नृभि.र्यतो वाज.मा दर्षि सातये।।
卐 परिप्रयन्तँ वय्यं सुषंसदं- सोमं मनीषा^ अभ्यनूषत स्तुभः। यो धारया मधुमाः ऊर्मिणा दिव^- इयर्ति वाचं रयिषा.ळमर्त्यः।।
卐 अय.न्दिव^ इयर्ति विश्व.मा रज.-स्सोमः पुनानः कलशेषु सीदति। अद्भि. गोभि.र्मृज्यते अद्रिभि.स्सुतः- पुनान^ इन्दु.र्वरिवो विद.त्प्रियम्।।
卐 एवा न.स्सोम परिषिच्यमानो- वयो दध.च्चित्रतमं पवस्व। अद्वेषे~ द्यावापृथिवी~ हुवेम- देवा^ धत्त रयि.मस्मे~ सुवीरम्।।

9.71 इषु.र्नैति दशर्चस्य सूक्तस्याऽऽङ्गिरसो हिरण्यस्तूपः- पवमान.स्सोमो- जग-त्यन्त्ये द्वे त्रिष्टुभौ।।

07.02.21 इषु.र्न धन्व.न्प्रति धीयते मति.-र्वत्सो न मातु.रुप स.र्ज्यूधनि। उरुधारेव दुहे अग्र आय.-त्यस्य व्रते.ष्वपि सोम इष्यते।।

उपो मतिः पृच्यते सिच्यते मधु- मन्द्राऽजनी चोदते अन्त.रासनि। पवमान.स्सन्तनिः प्रघ्नतामिव- मधुमा.न्द्रप्सः परि वार.मर्षति।।

अव्ये वधूयुः पवते परि त्वचि- श्रथ्नीते नप्ती.रदितेर् ऋतँ यते। हरि.रक्रा. न्यजत.स्सँयतो मदो- नृम्णा शिशानो महिषो न शोभते।।

उक्षा मिमाति प्रति यन्ति धेनवो- देवस्य देवी.रुप यन्ति निष्कृतम्। अत्यक्रमी.दर्जुनँ वार.मव्यय.-मत्क.न्न निक्तं परि सोमो अव्यत।।

अमृक्तेन रुशता वाससा हरि.-रमर्त्यो निर्णिजानः परि व्यत। दिव.स्पृष्ठं बर्हणा निर्णिजे कृ.-तोपस्तरण.ञ्चम्वो.र्नभस्मयम्।।

07.02.22 सूर्यस्येव रश्मयो द्रावयित्नवो- मत्सरासः प्रसुप.स्साक. मीरते। तन्तु.न्ततं परि सर्गास आशवो- नेन्द्रा.दृते पवते धाम कि.ञ्चन।।

सिन्धोरिव प्रवणे निम्न आशवो- वृषच्युता मदासो गातु.माशत। श.न्नो निवेशे द्विपदे चतुष्पदे-ऽस्मे वाजा.स्सोम तिष्ठन्तु कृष्टयः।।

आ नः पवस्व वसुम.द्धिरण्यव.-दश्वाव.द्गोम.द्यवम.त्सुवीर्यम्। यूयं हि सोम पितरो मम स्थन- दिवो मूर्धानः प्रस्थिता वयस्कृतः।।

卐 एते सोमाः पवमानास^ इन्द्रं- रथा^इव प्र ययु.स्साति.मच्छ। सुताः पवित्र. मति य.न्त्यव्यं- हित्वी वव्रिं हरितो वृष्टि.मच्छ।।

卐 इन्द.विन्द्राय बृहते पवस्व- सुमृळीको अनवद्यो रिशादाः। भरा चन्द्राणि गृणते वसूनि- देवै.र्द्यावापृथिवी~ प्राऽवत.न्नः।।

9.72 त्रि.रस्मा इति दशर्चस्य सूक्तस्य, वैश्वामित्रो रेणुः- पवमान.स्सोमो- जग.-त्यन्त्या त्रिष्टुप्।।

❀07.02.23 卐त्रि.रस्मै सप्त धेनवो दुदुह्रे- सत्या.माशिरं पूर्व्ये व्योमनि। चत्वा.र्यन्या भुवनानि निर्णिजे- चारूणि चक्रे य.दृतै.रवर्धत।।

卐 स^ भिक्षमाणो अमृतस्य चारुण^- उभे~ द्यावा काव्येना वि शश्रथे। तेजिष्ठा^ अपो मंहना परि व्यत- यदी देवस्य श्रवसा सदो विदुः।।

卐 ते अस्य सन्तु केतवोऽमृत्यवो-ऽदाभ्यासो जनुषी~ उभे~ अनु। येभि. र्नृम्णा च देव्या च पुनत- आ.दि.द्राजानं मनना^ अगृभ्णत।।

卐 स^ मृज्यमानो दशभि.स्सुकर्मभिः- प्र मध्यमासु मातृषु प्रमे सचा। व्रतानि पानो अमृतस्य चारुण^- उभे~ नृचक्षा^ अनु पश्यते विशौ।।

卐 स^ मर्मृजान^ इन्द्रियाय धायस- ओभे~ अन्ता^ रोदसी~ हर्षते हितः। वृषा शुष्मेण बाधते वि दुर्मती.-रादेदिशान.श्शर्यहेव शुरुधः।।

❀07.02.24 卐स^ मातरा न ददृशान^ उस्रियो- नानद.देति मरुतामिव स्वनः। जान.न्नृतं प्रथमँ य.त्स्वर्णरं- प्रशस्तये क.मवृणीत सुक्रतुः।।

卐 रुवति भीमो वृषभ.स्तविष्यया- शृङ्गे~ शिशानो हरिणी~ विचक्षणः। आ योनिं सोम.स्सुकृत.न्नि ¤षीदति- गव्ययी त्व.ग्भवति नि¤र्णि.ग्व्ययी।।

卐 शुचिꣳ पुनान.स्तन्व.मरेपस.-मव्ये हरि.न्र्यधाविष्ट सानवि। जुष्टो मित्राय वरुणाय वायवे- त्रिधातु मधु क्रियते सुकर्मभिः।।

卐 पवस्व सोम देववीतये वृ.-षेन्द्रस्य हार्दि सोमधान.मा विश। पुरा नो बाधा. दुरिताऽति पारय- क्षेत्रवि.द्धि दिश^ आहा विपृच्छते।।

卐 हितो न सप्ति.रभि वाज म.-र्षेन्द्र.स्येन्दो~ जठर.मा पवस्व। नावा न सिन्धु. मति पर्षि विद्वा.-न्छूरो न युध्य.न्नव नो निद.स्स्पः’।।

9.73 आ दक्षिणेति नवर्चस्य सूक्तस्य, वैश्वामित्र ऋषभः- पवमान.स्सोमो- जग.-त्यन्त्या त्रिष्टुप्।।

❀07.02.25 卐आ दक्षिणा सृज्यते शुष्म्या3(आ) सदँ- वेति द्रुहो रक्षसꣳ पाति जागृविः। हरि.रोपश.ङ्कृणुते नभ.स्पय^- उपस्तिरे चम्वो3(ओ).र्ब्रह्म नि¤र्णिजे।।

卐 प्र कृष्टिहेव शूष^ एति रोरुव.-दसुर्य1(अँ) वर्ण.न्नि रिणीते अस्य तम्। जहाति वव्रिं पितु.रेति निष्कृत.-मुपप्रुत.ङ्कृणुते निर्णिज.न्तना।

卐 अद्रिभि.स्सुतꣳ पवते गभस्त्यो.-र्वृषायते नभसा वेपते मती। स^ मोदते नसते साधते गिरा- नेनिक्ते अप्सु यजते परीमणि।।

卐 परि द्युक्षं सहसꣳ पर्वतावृधं- मध्व.स्सिञ्चन्ति हर्म्यस्य सक्षणिम्। आ यस्मि.न्गाव.स्सुहुताऽद^ ऊधनि- मूर्ध.न्छ्रीण.न्त्यग्रियँ वरीमभिः।।

卐 समी रथ.न्न भुरिजो.रहेषत- दश स्वसारो अदिते.रुपस्थ आ। जिगा.दुप ज्रयति गो.रपीच्यं- पदँ य.दस्य मतुथा^ अजीजनन्न्।।

❀07.02.26 卐श्येनो न योनिं सदन.न्धिया कृतं- हिरण्यय.मासद.न्देव^ एषति। ए रिणन्ति बर्हिषि प्रिय.ङ्गिरा-ऽश्वो न देवा॰ अप्येति यज्ञियः।। (आ, ईम् इति, रिणन्ति)

卐 परा व्यक्तो अरुषो दिव॰ कवि.-र्वृषा त्रिपृष्ठो अनविष्ट गा^ अभि। सहस्र॰णीति.र्यति॰ परायती^- रेभो न पूर्वी.रुषसो वि राजति।।

卐 त्वेषं रूप.ङ्कृणुते वर्णो अस्य स^- यत्राऽशय.त्समृता सेधति स्त्रिधः। अप्सा^ याति स्वधया दैव्य.ञ्जनं- सं सु॰ष्टुती नसते स.ङ्गोअग्रया।।

卐 उक्षेव यूथा परिय.न्नरावी.-दधि त्विषी^. रधित सूर्यस्य। दिव्य.स्सुपर्णोऽव चक्षत क्षां- सोम॰ परि क्रतुना पश्यते जाः।।

9.74 हरिं मृजन्तीति नवर्चस्य सूक्तस्याऽङ्गिरसा हरिमन्तः- पवमान.स्सोमो- जगती।।

❀07.02.27 卐हरिं मृज.न्त्यरुषो न युज्यते- स.न्धेनुभि॰ कलशे सोमो अज्यते। उ.द्वाच.मीरयति हिन्वते मती- पुरु॰ष्टुतस्य कति चि.त्परिप्रियः।।

卐 साकँ वदन्ति बहवो मनीषिण^- इन्द्रस्य सोम.ञ्जठरे य.दादुहुः। यदी मृजन्ति सुगभस्तयो नर.-स्सनीळाभि.र्दशभि॰ काम्यं मधु।।

卐 अरममाणो अत्येति गा^ अभि- सूर्यस्य प्रिय.न्दुहितु.स्तिरो रवम्। अन्वस्मै जोष.मभर.द्विनङ्गृस.-स्स.न्द्वयीभि.स्स्वसृभिः≈ क्षेति जामिभिः।।

卐 नृधूतो अद्रि¤षुतो बर्हिषि प्रिय॰- पति.र्गवां प्रदिव^ इन्दुर् ऋत्वियः। पुरन्धिवा.न्मनुषो यज्ञसाधन.-श्शुचि.र्धिया पवते सोम^ इन्द्र ते।।

卐 नृबाहुभ्या.ञ्चोदितो धारया सुतो-ऽनु¤ष्वधं पवते सोम^ इन्द्र ते। आऽप्रा॰ क्रतू.न्त्स.मजै.रध्वरे मती.-र्वे.र्न द्रु¤ष.च्चम्वो3(ओ).राऽसद्.द्धरिः।।

❀07.02.28 卐अंशु.न्दुहन्ति स्तनयन्त.मक्षित.-ङ्कवि.ङ्कवयोऽपसो मनीषिणः। समी गावो मतयो यन्ति सँयत^- ऋतस्य योना सदने पुनर्भुवः।।

卐 नाभा पृथिव्या^ धरुणो महो दिवो3(ओ)-ऽपा.मूर्मौ सिन्धु.ष्वन्त.रुक्षितः। इन्द्रस्य वज्रो वृषभो विभूवसु.-स्सोमो हृदे पवते चारु मत्सरः।।

卐 स^ तू पवस्व परि पार्थिवं रज.-स्स्तोत्रे शिक्ष.न्नाधून्वते च सुक्रतो~। मा नो निर्भा.ग्वसुन.स्सादनस्पृशो- रयिं पिशङ्गं बहुलँ वसीमहि।।

卐 आ तू न इन्दो~ शतदा.त्वश्व्यं- सहस्रदातु पशुम.द्धिरण्यवत्। उप मास्व बृहती^ रेवती. रिषो-ऽधि स्तोत्रस्य पवमान नो गहि।।

9.76 स्रक्के द्रप्सस्येति नवर्चस्य सूक्तस्याऽऽङ्गिरसः पवित्रः- पवमान.स्सोमो- जगती।।

❀07.02.29 卐स्रक्के द्रप्सस्य धमत.स्स.मस्वर.-न्नृतस्य योना स.मरन्त नाभयः। त्री.न्त्स^ मूर्ध्नो असुर.श्चक्र आरभे- सत्यस्य नाव.स्सुकृत. मपीपरन्न्।।

卐 सम्य.क्सम्यञ्चो महिषा^ अहेषत- सिन्धो.रूर्मा.वधि वेना^ अवीविपन्न्।
मधो.र्धाराभि. र्जनयन्तो अर्क.मि.-त्प्रिया.मिन्द्रस्य तन्व.मवीवृधन्न्।।
卐 पवित्रवन्तः परि वाच.मासते- पितैषां प्रत्नो अभि रक्षति व्रतम्।
मह.स्समुद्रँ वरुण.स्तिरो दधे- धीरा^ इ.च्छेकु.र्धरुणे.ष्वारभम्।।
卐 सहस्रधारेऽव ते स.मस्वर.-न्दिवो नाके मधुजिह्वा^ असश्चतः। अस्य स्पशो न नि मिषन्ति भूर्णयः- पदेपदे पाशिन.स्सन्ति सेतवः।।
卐 पितु.र्मातु.रध्या ये समस्वर.-न्नृचा शोचन्त.स्सन्दहन्तो अव्रतान्।
इन्द्रद्विष्टा. मप धमन्ति मायया- त्वच. मसिक्नीं भूमनो दिव.स्परि।।
❀07.02.30 卐प्रत्ना.न्माना.दध्या ये समस्वर.-न्छ्लोकयन्त्रासो रभसस्य मन्तवः। अपाऽनक्षासो बधिरा^ अहासत- ऋतस्य पन्था.न्न तरन्ति दुष्कृतः।।
卐 सहस्रधारे वितते पवित्र आ- वाचं पुनन्ति कवयो मनीषिणः। रुद्रास^ एषा. मिषिरासो अद्रुह.-स्स्पश.स्स्वञ्च.स्सुदृशो नृचक्षसः।।
卐 ऋतस्य गोपा^ न दभाय सुक्रतु.-स्त्री ष^ पवित्रा हृद्य1(अ)न्त.रा दधे।
विद्वा.न्त्स^ विश्वा भुवनाऽभि पश्य.-त्यवाऽजुष्टा.न्विध्यति कर्ते अव्रतान्।।
卐 ऋतस्य तन्तु.र्विततः पवित्र आ- जिह्वाया^ अग्रे वरुणस्य मायया।
धीरा.श्चि.त्त.त्समिनक्षन्त^ आशता.-ऽत्रा कर्त. मव पदा.त्यप्रभुः।।
9.76 शिशु.र्नैति नवर्चस्य सूक्तस्य, दैर्घतमसः कक्षीवान्- पवमान.स्सोमो- जग-त्यष्टमी त्रिष्टुप्।।

❀07.02.31 卐शिशु.र्न जातोऽव चक्रद्.द्वने- स्व1(अ).र्य.द्वा.ज्यरुष.
ꣳस्सिषासति। दिवो रेतसा सचते पयोवृधा- त.मीमहे सुमती शर्म सप्रथः।।
卐 दिवो य.स्स्कम्भो धरुण.स्स्वातत^- आपूर्णो अंशुः पर्यैति विश्वतः।
सेमे~ मही~ रोदसी~ यक्ष.दावृता- समीचीने~ दाधार स.मिषः कविः।।
卐 महि प्सर.स्सुकृतं सोम्यं म.-धूर्वी गव्यूति.रदितेर् ऋतं यते। ईशे यो वृष्टे.
रित^ उस्रियो वृषा-ऽपा.न्नेता य^ इतऊतिर् ऋग्मियः।।
卐 आत्मन्व.न्नभो दुह्यते घृतं पय^- ऋतस्य नाभि.रमृतं वि जायते।
समीचीना. स्सुदानवः प्रीणन्ति- त.न्नरो हित.मव मेहन्ति पेरवः।।
卐 अरावी.दंशु.स्सचमान^ ऊर्मिणा- देवाऽव्य1(अं) मनुषे पिन्वति त्वचम्।
दधाति गर्भ.मदिते.रुपस्थ आ- येन तोक.ञ्च तनय.ञ्च धामहे।।
❀07.02.32 卐सहस्रधारेऽव ता^ असश्चत.-स्तृतीये सन्तु रजसि
प्रजावतीः। चतस्रो नाभो निहिता^ अवो दिवो-
हवि.र्भर.न्त्यमृत.ङ्घृतश्चुतः।।
卐 श्वेतं रूप.ङ्कृणुते य.ꣳत्सिषासति- सोमो मीढ्वाꣳ असुरो वेद भूमनः। धिया
शमी सचते से.मभि प्रव.-द्दिव.स्कवन्ध.मव दर्ष.दुद्रिणम्।।
卐 पुन अध श्वेत.ङ्कलशं गोभि.रक्त.-ङ्कार्ष्म.न्ना वा.ज्यक्रमी.त्ससवान्। आ
हिन्विरे मनसा देवयन्तः- कक्षीवते शतहिमाय गोनाम्।।
卐 अद्भि.स्सोम पपृचानस्य ते रसो-ऽव्यो वारँ वि पवमान धावति। स^
मृज्यमानः कविभि.र्मदिन्तम- स्वदस्वेन्द्राय पवमान पीतये।।

9.77 अभि प्रियाणीति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः- पवमान.स्सोमो- जगती।।

07.02.33 अभि प्रियाणि पवते चनोहितो- नामानि यह्वो अधि येषु वर्धते। आ सूर्यस्य बृहतो बृह.न्नधि- रथँ विष्वञ्च.मरुह.द्विचक्षणः।।

ऋतस्य जिह्वा पवते मधु प्रियँ- वक्ता पति.र्धियो अस्या अदाभ्यः। दधाति पुत्रः पित्रो.रपीच्य1(अ).-न्नाम तृतीय.मधि रोचने दिवः।।

अव द्युतानः कलशाँ अचिक्रद.-न्नृभि.र्येमानः कोश आ हिरण्यये। अभी.मृतस्य दोहना अनूषता-ऽधि त्रिपृष्ठ उषसो वि राजति।।

अद्रिभि.स्सुतो मतिभि.श्चनोहितः- प्ररोचय.न्रोदसी मातरा शुचिः। रोमा.ण्यव्या समया वि धावति- मधो.र्धारा पिन्वमाना दिवेदिवे।।

परि सोम प्र धन्वा स्वस्तये- नृभिः पुनानो अभि वासया ऽऽशिरम्। ये ते मदा आहनसो विहायस.-स्तेभि.रिन्द्र.ञ्चोदय दातवे मघम्।।।। इति द्वितीयाध्याय स्समाप्तः।।

## सप्तमाष्टके तृतीयाध्यायः (वर्गाः 1-26)

9.78 धर्तेति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः पवमानस्सोमो जगती।

07.03.0 धर्ता दिवः पवते कृत्व्यो रसो- दक्षो देवाना.मनुमाद्यो नृभिः। हरि.स्सृजानो अत्यो न सत्वभि.-र्वृथा पाजांसि कृणुते नदी.ष्वा।।

शूरो न धत्त आयुधा गभस्त्यो.-स्स्व1(अ)स्सिषास.न्रथिरो गविष्टिषु। इन्द्रस्य शुष्म.मीरय.न्नपस्युभि.-रिन्दु.र्हिन्वानो अज्यते मनीषिभिः।।

卐 इन्द्रस्य सोम पवमान^ ऊर्मिणा- तविष्यमाणो जठरे.ष्वा विश। प्र ꣳणः
पिन्व विद्यु.दभ्रेव रोदसी~- धिया न वाजा॒ उप मासि शश्वतः।।
卐 विश्वस्य राजा पवते स्वर्दृश^- ऋतस्य धीति.मृषिषा.ळवीवशत्।
य.स्सूर्यस्याऽसिरेण मृज्यते- पिता मतीना.मसमष्टकाव्यः।।
卐 वृषेव यूथा परि कोश.मर्ष.-स्यपा.मुपस्थे वृषभः कनिक्रदत्। स^ इन्द्राय
पवसे मत्सरिन्तमो- यथा जेषाम समिथे त्वोतयः।।

9.79 **एष^ इति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः पवमान.स्सोमो जगती।**

07.03.02 卐एष^ प्र कोशे मधुमा॒ अचिक्रद.-दिन्द्रस्य वज्रो वपुषो
वपुꣳष्टरः। अभी मृतस्य सुदुघा^ घृतश्चुतो- वाश्रा^ अर्षन्ति पयसेव धेनवः।।
卐 स^ पूर्व्यः पवते य.न्दिव.स्परि- श्येनो मथाय.दिषित.स्तिरो रजः। स^
मध्व^ आ युवते वेविजान^ इ.-त्कृशानो.रस्तु.र्मनसाऽह बिभ्युषा।।
卐 ते नः पूर्वास^ उपरास^ इन्दवो- महे वाजाय धन्वन्तु गोमते। ईक्षेण्यासो
अह्यो3(ओ) न चारवो- ब्रह्मब्रह्म ये जुजुषु.र्हविर्हविः।।
卐 अय.न्नो विद्वा.न्वनव.द्वनुष्यत^- इन्दु.स्सत्राचा मनसा पुरुꣳष्टुतः। इनस्य
य.स्सदने गर्भ.मादधे- गवा.मुरुब्ज.म.भ्यर्षति व्रजम्।।
卐 चक्रि.र्दिवः पवते कृत्व्यो रसो- महा॒ अदब्धो वरुणो हुरु.ग्यते। असावि
मित्रो वृजनेषु यज्ञियो-ऽत्यो न यूथे वृषयुः कनिक्रदत्।।

9.80 **प्र राजेति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः पवमान.स्सोमो जगती।**

❀07.03.03 卐प्र राजा वाच.ञ्जनय.न्नसिष्यद.-दपो वसानो अभि गा^ इयक्षति। गृभ्णाति रिप्र. मवि.रस्य तान्वा- शुद्धो देवाना.मुप याति निष्कृतम्।।

卐 इन्द्राय सोम परिषिच्यसे नृभि.-र्नृचक्षा^ ऊर्मिः कवि. रज्यसे वने। पूर्वी.र्हि ते स्रुतय.स्सन्ति यातवे- सहस्र.मश्वा^ हरय.श्चमूषदः।।

卐 समुद्रिया^ अप्सरसो मनीषिण.-मासीना^ अन्त.रभि सोम.मक्षरन्न्। ता^ ईं हिन्वन्ति हर्म्यस्य सक्षणिँ- याचन्ते सुम्नं पवमान.मक्षितम्।।

卐 गोजि.न्न.स्सोमो रथजि.द्धिरण्यजि.-त्स्वर्जि.दब्जि.त्पवते सहस्रजित्। य.न्देवास.श्चक्रिरे पीतये मदं- स्वादिष्ठ.न्द्रप्स.मरुणं मयोभुवम्।।

卐 एतानि सोम पवमानो अस्मयु.-स्सत्यानि कृण्व.न्द्रविणा.न्यर्षसि। जहि शत्रु.मन्तिके दूरके च - य^ उर्वी.ङ्गव्यूति.मभय.ञ्च न.स्कृधि।।

**9.81 अचोदस^ इति पञ्चर्चस्य सूक्तस्य, भार्गवः कविः पवमान.स्सोमो जगती।**

❀07.03.04 卐अचोदसो नो धन्व.न्त्विन्दवः- प्र सुवानासो बृहद्दिवेषु हरयः। वि च नश.न्न^ इषो अरातयो-ऽर्यो नशन्त सनिषन्त नो धियः।।

卐 प्र णो धन्व.न्त्विन्दवो मदच्युतो- धना वा येभि.रर्वतो जुनीमसि। तिरो मर्तस्य कस्य चि.त्परिह्वृतिँ- वय.न्धनानि विश्वधा भरेमहि।।

卐 उत स्वस्या^ अरात्या^ अरि.र्हि षः^- उताऽन्यस्या^ अरात्या^ वृको हि षः। धन्व.न्न तृष्णा स.मरीत ताँ अभि- सोम जहि पवमान दुराध्यः।।

卐 दिवि ते नाभा परमो य^ आददे- पृथिव्या.स्ते रुरुहु.स्सानवि क्षिपः। अद्रय.स्त्वा बप्सति गो.रधि त्वच्य1-(अ)प्सु त्वा हस्तै.र्दुदुह्.र्मनीषिणः।।

卐 एवा त इन्दो~ सुभ्वं सुपेशसं- रस.न्तुञ्जन्ति प्रथमा^ अभिश्रियः। निदन्निदं पवमान नि तारिष^- आवि.स्ते शुष्मो भवतु प्रियो मदः।।

9.82 **सोमस्येति पञ्चर्चस्य सूक्तस्य, भारद्वाजो वसुः पवमान.स्सोमो जगती।**

❀07.03.05 卐सोमस्य धारा पवते नृचक्षस^- ऋतेन देवा.न्हवते दिव.स्परि। बृहस्पते.रवथेना वि दिद्युते- समुद्रासो न सवनानि विव्यचुः।।

卐 य.न्त्वा वाजि.न्नघ्न्या^ अभ्यनूषता-ऽयोहतँ योनि.मा रोहसि द्युमान्। मघोना. मायुः॰ प्रतिर.न्महि श्रव^- इन्द्राय सोम पवसे वृषा मदः।।

卐 एन्द्रस्य कुक्षा पवते मदिन्तम^- ऊर्जँ वसान.श्श्रवसे सुमङ्गलः। प्रत्य.ङ्स^ विश्वा भुवनाऽभि पप्रथे- क्रीळ.न्हरि.रत्य.स्स्यन्दते वृषा।।

卐 त.न्त्वा देवेभ्यो मधुमत्तम.न्नर.-स्सहस्रधार.न्दुहते दश क्षिपः। नृभि.स्सोम प्रच्युतो ग्रावभि.स्सुतो- विश्वा.न्देवा॰ आ पवस्वा सहस्रजित्।।

卐 त.न्त्वा हस्तिनो मधुमन्त.मद्रिभि.-र्दुह.न्त्यप्सु वृषभ.न्दश क्षिपः। इन्द्रं सोम मादय.न्दैव्य.ञ्जनं- सिन्धोरिवोर्मिः॰ पवमानो अर्षसि।।

9.83 **प्र सोमस्येति पञ्चर्चस्य सूक्तस्य, भारद्वाजो वसुः पवमान.स्सोमो जग.त्यन्त्या त्रिष्टुप्।**

❀07.03.06 卐प्र सोमस्य पवमानस्योर्मय^- इन्द्रस्य यन्ति जठरं सुपेशसः। दध्ना य.दी.मुन्नीता^ यशसा गवा.-न्दानाय शूर.मुदमन्दिषु.स्सुताः।।

卐 अच्छा हि सोमः कलशाँ असिष्यद.-दत्यो न वोळ्हा रघुवर्तनि.वृषा। अथा देवाना.मुभयस्य जन्मनो- विद्वाँ अश्नो.त्यमुत^ इत.श्च यत्।।

卐 आ न.स्सोम पवमानः किरा व-स्विन्दो~ भव मघवा राधसो महः। शिक्षा वयोधो वसवे सु चेतुना- मा नो गय.मारे अस्म.त्परा सिचः।।

卐 आ नः पूषा पवमान.स्सुरातयो- मित्रो गच्छन्तु वरुण.स्सजोषसः। बृहस्पति.र्मरुतो वायु.रश्विना- त्वष्टा सविता सुयमा सरस्वती।।

卐 उभे~ द्यावापृथिवी~ विश्वमिन्वे~- अर्यमा देवो अदिति.र्विधाता। भगो नृशंस^ उर्व1(अ)न्तरिक्षँ- विश्वे देवाः पवमान.ञ्जुषन्त।।

9.84 **असावीति पञ्चर्चस्य सूक्तस्य, भारद्वाजो वसुः पवमान.स्सोमो जग.त्यन्त्या त्रिष्टुप्।**

❀07.03.07 卐असावि सोमो अरुषो वृषा हरी^- राजेव दस्मो अभि गा^ अचिक्रदत्। पुनानो वारं पर्ये.त्यव्ययं- श्येनो न योनि.र्घृतवन्त.मासदम्।।

卐 कवि.र्वेधस्या प.र्येषि माहिन.-मत्यो न मृष्टो अभि वाज.मर्षसि। अपसेध.न्दुरिता सोम मृळय- घृतँ वसानः परि यासि निर्णिजम्।।

卐 पर्जन्यः पिता महिषस्य पर्णिनो- नाभा पृथिव्या^ गिरिषु क्षय.न्दधे। स्वसार^ आपो अभि गा^ उताऽसर.-न्त्स.ङ्ग्रावभि.र्नसते वीते अध्वरे।।

卐 जायेव पत्या.वधि शेव मंहसे- पज्राया^ गर्भ श्रृणुहि ब्रवीमि ते। अन्त.र्वाणीषु प्र चरा सु जीवसे- ऽनिन्द्यो वृजने सोम जागृहि।।

卐 यथा पूर्वेभ्य.श्शतसा^ अमृध्र.-स्सहस्रसाः पर्यया^ वाज.मिन्दो~। एवा पवस्व सुविताय नव्यसे- तव व्रत.म.न्वाप.स्सचन्ते।।

9.85 पवित्र.न्त इति पञ्चर्चस्य सूक्तस्याऽङ्गिरसः पवित्रः पवमान.स्सोमो जगती।

❀07.03.08 卐पवित्र.न्ते विततं ब्रह्मण.स्पते- प्रभु.र्गात्राणि पर्येषि विश्वतः। अतप्ततनू.र्न त.दामो अश्नुते- श्रृतास^ इ.द्वहन्त.स्त.त्स.माशत।।

卐 तपो.ष्पवित्रँ वितत.न्दिव.स्पदे- शोचन्तो अस्य तन्तवो व्यस्थिरन्न्। अव.न्त्यस्य पवीतार.माशवो- दिव.स्पृष्ठ.मधि तिष्ठन्ति चेतसा।।

卐 अरूरुच.दुषसः पृश्नि.रग्रिय^- उक्षा बिभर्ति भुवनानि वाजयुः। मायाविनो ममिरे अस्य मायया- नृचक्षसः पितरो गर्भ.मा दधुः।।

卐 गन्धर्व^ इत्था पद.मस्य रक्षति- पाति देवाना.ञ्जनिमा.न्यद्भुतः। गृभ्णाति रिपु.न्निधया निधापति.-स्सुकृत्तमा^ मधुनो भक्ष.माशत।।

卐 हवि.र्हविष्मो महि सद्म दैव्य.-न्नभो वसानः परि या.स्यध्वरम्। राजा पवित्ररथो वाज.माऽरुह.-स्सहस्रभृष्टि.र्जयसि श्रवो बृहत्।।

9.86 पवस्वेति पञ्चर्चस्य सूक्तस्य, वाच्यः प्रजापतिः पवमान.स्सोमो जगती।

❀07.03.09 卐पवस्व देवमादनो विचर्षणि.-रप्सा^ इन्द्राय वरुणाय वायवे। कृधी नो अद्य वरिव.स्स्वस्तिम.-दुरुक्षितौ गृणीहि दैव्य.ञ्जनम्।।

卐 आ य.स्तस्थौ भुवना.न्यमर्त्यो- विश्वानि सोमः परि ता.न्यर्षति। कृण्व.न्त्सञ्चृतँ विचृत.मभिष्टय- इन्दु.स्सिस.क्त्युषस.न्न सूर्यः।।

卐 आ यो गोभि.स्सृज्यत ओषधी.ष्वा- देवानां सुम्न इषय.न्नुपावसुः। आ विद्युता पवते धारया सुत^- इन्द्रं सोमो मादय.न्दैव्य.ञ्जनम्।।

卐 एष^ स्य^ सोमः पवते सहस्रजि.-द्धिन्वानो वाच.मिषिरा.मुषर्बुधम्। इन्दु.स्समुद्र.मु.दियर्ति वायुभि.-रेन्द्रस्य हार्दि कलशेषु सीदति।।

卐 अभि त्य.ङ्गावः पयसा पयोवृधं- सोमं श्रीणन्ति मतिभि.स्स्वर्विदम्। धनञ्जयः पवते कृत्व्यो रसो- विप्रः कविः काव्येना स्वर्चनाः।।

9.87 **इन्द्रायेति द्वादशर्चस्य सूक्तस्य, भार्गवो वेनः पवमान.स्सोमो जग.त्यन्त्ये द्वे त्रिष्टुभौ।**

❀07.03.10 卐इन्द्राय सोम सुषुतः परि स्रवा-ऽपाऽमीवा भवतु रक्षसा सह। मा ते रसस्य मत्सत द्वयाविनो- द्रविणस्वन्त^ इह स.न्त्विन्दवः।।

卐 अस्मा.न्त्समर्ये पवमान चोदय- दक्षो देवाना.मसि हि प्रियो मदः। जहि शत्रूँ र.भ्या भन्दनायतः- पिबेन्द्र सोम.मव नो मृधो जहि।।

卐 अदब्ध^ इन्दो~ पवसे मदिन्तम^- आ.त्मेन्द्रस्य भवसि धासि.रुत्तमः। अभि स्वरन्ति बहवो मनीषिणो- राजान.मस्य भुवनस्य निंसते।।

卐 सहस्र॒णीथ.श्शतधा॑रो॒ अद्भु॑त॒^- इन्द्रा॒येन्दु॑ः पवते॒ काम्यं॒ मधु॑।
जय॒.न्क्षेत्र. म॒.भ्यर्षा॒ जय॒.न्नप^- उ॒रु.न्नो गा॒तु.ङ्कृणु सोम मीढ्वः।।
卐 कनि॑क्रद.त्कलशे॒ गोभि॑.रज्यसे- व्य1(अ)व्ययं॒ समया॒ वार॑.मर्षसि।
म॒र्मृज्यमा॑नो॒ अत्यो॒ न सा॒नसि.-रिन्द्रस्य सोम ज॒ठरे॒ स.मक्षरः।।
卐 स्वादु॒ः पवस्व॒ दि॒व्याय॒ जन्म॑ने- स्वा॒दु.रिन्द्राय॒ सु॒हवी॑तुनाम्ने।
स्वा॒दु.र्मि॒त्राय॒ वरु॑णाय वा॒यवे॒- बृह॒स्पत॑ये॒ मधुमा॒ अदा॑भ्यः।।
❀07.03.11 卐अत्यं॑ मृजन्ति क॒लशे॒ दश॒ क्षिप॒ः- प्र विप्रा॑णां म॒तयो॒ वाच^
ईरते। पव॑माना^ अ॒.भ्यर्षन्ति सु॒ष्टुति.-मेन्द्रँ॑ विशन्ति मदि॒रास॒^ इन्दवः।।
卐 पव॑मानो अ॒.भ्यर्षा॒ सुवीर्य॒.-मुर्वी.ङ्गव्यू॑तिं॒ महि॒ शर्म॒ सप्रथः। माकि॑.र्नो
अ॒स्य परि॑षूति.रीश॒.-तेन्दो॒~ जये॒म त्वया॒ धनं॑धनम्।।
卐 अधि॒ द्या.मस्था.द्वृ॒षभो विचक्ष॒णो-ऽरू॑रुच.द्वि दि॒वो रोच॒ना क॒विः। राजा
प॒वित्र॒.म.त्येति रोरु॒व.-द्दि॒वः पी॒यूष.न्दुहते नृ॒चक्षसः।।
卐 दि॒वो नाके॒ मधु॒जिह्वा^ अस॒श्चतो॒- वेना॒^ दुह.न्त्युक्षण.ङ्गि॒रि॒ष्ठाम्। अप्सु
द्र॒प्सँ वावृ॒धानं॑ समु॒द्र आ- सिन्धो॒.रूर्मा मधु॑मन्तं प॒वित्र॒ आ।।
卐 नाके सु॒पर्ण.मुपप॒प्तिवां॒स.-ङ्गिरो वेनाना.मकृपन्त पू॒र्वीः। शिशुं॑ रिहन्ति
म॒तय॒ः पनि॑प्नतं- हि॒रण्ययं शकुन.ङ्क्षाम॒णि॒ स्थाम्।।
卐 ऊ॒र्ध्वो गन्ध॒र्वो अधि॒ नाके अस्था॒.-द्विश्वा॒ रू॒पा प्र॒तिचक्षा॑णो अस्य।
भा॒नु.श्शु॒क्रेण॒ शोचि॒षा॒ व्यद्यौ॒.-त्प्राऽरूरुच.द्रोद॒सी~ मा॒तरा॒ शुचिः।।
🏺पञ्चमेऽनुवाके एकादशसूक्तानि

9.88 प्र त आशव^ इ.त्यष्टाचत्वारिंश.दृचस्य सूक्तस्य, आद्यानां दशाना.मकृष्टामाषा^ ऋषयः, एकादश्यादि दशानां सिकता निवावरी एकविंश्यादि दशानां पृश्न्योजाः, एकत्रिंश्यादि दशाना.मत्रयः- एकचत्वारिंश्यादि पञ्चानां भौमोऽत्रिः, अन्त्यानां तिसृणां शौनको गृत्समदः, पवमान.स्सोमो जगती।

07.03.12 प्र त आशवः पवमान धीजवो- मदा^ अर्षन्ति रघुजा^इव त्मना। दिव्या.स्सुपर्णा^ मधुमन्त^- इन्दवो मदिन्तमासः परि कोश.मासते।।

प्र ते मदासो मदिरास^ आशवो-ऽसृक्षत रथ्यासो यथा पृथक्। धेनु.र्न वत्सं पयसाऽभि वज्रिण.-मिन्द्र.मिन्दवो मधुमन्त^ ऊर्मयः।।

अत्यो न हियानो अभि वाज.मर्ष- स्वर्वि.त्कोश.न्दिवो अद्रिमातरम्। वृषा पवित्रे अधि सानो अव्यये- सोमः पुनान^ इन्द्रियाय धायसे।।

प्र त आश्विनीः पवमान धीजुवो- दिव्या^ असृग्र.न्पयसा धरीमणि। प्राऽन्तर् ऋषय.स्स्थाविरी.रसृक्षत- ये त्वा मृज.न्त्यृषिषाण वेधसः।।

विश्वा धामानि विश्वचक्ष^ ऋभ्वसः- प्रभो.स्ते सतः परि यन्ति केतवः। व्यानशिः पवसे सोम धर्मभिः- पति. र्विश्वस्य भुवनस्य राजसि।।

07.03.13 उभयतः पवमानस्य रश्मयो- ध्रुवस्य सतः परि यन्ति केतवः। यदी पवित्रे अधि मृज्यते हरि.-स्सत्ता नि योना कलशेषु सीदति।।

卐 यज्ञस्य केतुः पवते स्वध्वर.-स्सोमो देवाना.मुप याति निष्कृतम्।
सहस्रधारः परि कोश.मर्षति- वृषा पवित्र.म.त्येति रोरुवत्।।

卐 राजा समुद्र.न्नद्यो3(ओ) वि गाहते-ऽपा.मूर्मिं सचते सिन्धुषु श्रितः।
अध्यस्था.त्सानु पवमानो अव्यय.-न्नाभा पृथिव्या^ धरुणो महो दिवः।।

卐 दिवो न सानु स्तनय.न्नचिक्रद.-द्यौ.श्च यस्य पृथिवी च धर्मभिः। इन्द्रस्य
सख्यं पवते विवेविद.-त्सोमः पुनानः कलशेषु सीदति।।

卐 ज्योति.र्यज्ञस्य पवते मधु प्रियं- पिता देवाना.ञ्जनिता विभूवसुः। दधाति
रत्नं स्वधयो.रपीच्यं- मदिन्तमो मत्सर^ इन्द्रियो रसः।।

❀07.03.14 卐अभिक्रन्द.न्कलशँ वा.ज्यर्षति- पति.र्दिव.श्शतधारो
विचक्षणः। हरि.र्मित्रस्य सदनेषु सीदति- मर्मृजानोऽविभि.स्सिन्धुभि.र्वृषा।।

卐 अग्रे सिन्धूनां पवमानो अर्ष.-त्यग्रे वाचो अग्रियो गोषु गच्छति। अग्रे
वाजस्य भजते महाधनं- स्वायुध.स्सोतृभिः पूयते वृषा।।

卐 अयं मतवा.न्छकुनो यथा हितो-ऽव्ये ससार पवमान^ ऊर्मिणा। तव
क्रत्वा रोदसी~ अन्तरा कवे- शुचि.र्धिया पवते सोम^ इन्द्र ते।।

卐 द्रापिँ वसानो यजतो दिविस्पृश.-मन्तरिक्षप्रा^ भुवने.ष्वर्पितः।
स्व.र्जज्ञानो नभसाऽभ्यक्रमी.-त्प्रत्न.मस्य पितर.मा विवासति।।

卐 सो अस्य विशे महि शर्म यच्छति- यो अस्य धाम प्रथमँ व्यानशे। पदँ
य.दस्य परमे व्योम.-न्यतो विश्वा^ अभि सँ याति सँयतः।।

❀07.03.15 卐प्रो~ अयासी.दिन्दु.रिन्द्रस्य निष्कृतं- सखा सख्यु.र्न प्र मिनाति सङ्गिरम्। मर्य^इव युवतिभि.स्स.मर्षति- सोमः कलशे शतयाम्ना पथा।।
卐 प्र वो धियो मन्द्रयुवो विपन्युवः- पनस्युव.स्सँवसने.ष्वक्रमुः। सोमं मनीषा^ अभ्यनूषत स्तुभो-ऽभि धेनवः पयसे.मशिश्रयुः।।
卐 आ न.स्सोम सँयतं पिप्युषी.मिष.-मिन्दो~ पवस्व पवमानो अस्रिधम्। या नो दोहते त्रि.रह.न्नसश्चुषी- क्षुम.द्वाजव.न्मधुम.त्सुवीर्यम्।।
卐 वृषा मतीनां पवते विचक्षण.-स्सोमो अह्नः प्रतरी.तोषसो दिवः। क्राणा सिन्धूना.ङ्कलशाँ अवीवश.-दिन्द्रस्य हा.र्द्याविश.न्मनीषिभिः।।
卐 मनीषिभिः पवते पूर्व्यः कवि.-र्नृभि.र्यतः परि कोशाँ अचिक्रदत्। त्रितस्य नाम जनय.न्मधु क्षर-दिन्द्रस्य वायो.स्सख्याय कर्तवे।।
❀07.03.16 卐अयं पुनान^ उषसो वि रोचय.-दयं सिन्धुभ्यो अभव.दु लोककृत्। अय.न्त्रि.स्सप्त दुदुहान^ आशिरं- सोमो हृदे पवते चारु मत्सरः।।
卐 पवस्व सोम दिव्येषु धामसु- सृजान^ इन्दो~ कलशे पवित्र आ। सीद. न्निन्द्रस्य जठरे कनिक्रद.-न्नृभि.र्यत.स्सूर्य.माऽरोहयो दिवि।।
卐 अद्रिभि.स्सुतः पवसे पवित्र आँ- इन्द.विन्द्रस्य जठरे.ष्वाविशन्न्। त्व.न्नृचक्षा^ अभवो विचक्षण- सोम गोत्र.मङ्गिरोभ्योऽवृणो. रप।।

卐 त्वां सोम पवमानं स्वाध्यो-ऽनु विप्रासो अमद.न्नवस्यवः। त्वां सुपर्ण^ आऽभर.द्दिवस्प-रीन्दो~ विश्वाभि.र्मतिभिः परिष्कृतम्।।
卐 अव्ये पुनानं परि वार ऊर्मिणा- हरि.न्नवन्ते अभि सप्त धेनवः। अपा.मुपस्थे अध्यायवः कवि.-मृतस्य योना महिषा^ अहेषत।।
❀07.03.13 卐इन्दुः पुनानो अति गाहते मृधो- विश्वानि कृण्व.न्त्सुपथानि यज्यवे। गाः कृण्वानो निर्णिजं हर्यतः कवि.-रत्यो न क्रीळ.न्परि वार.मर्षति।।
卐 असश्चत.श्शतधारा^ अभिश्रियो- हरि.न्नवन्तेऽव ता^ उदन्युवः। क्षिपो मृजन्ति परि गोभि.रावृत.-न्तृतीये पृष्ठे अधि रोचने दिवः।।
卐 त.वेमाः प्रजा^ दिव्यस्य रेतस.-स्त्वँ विश्वस्य भुवनस्य राजसि। अथेदँ विश्वं पवमान ते वशे- त्व.मिन्दो~ प्रथमो धामधा^ असि।।
卐 त्वं समुद्रो असि विश्ववि.त्कवे- त.वेमाः पञ्च प्रदिशो विधर्मणि। त्व.न्द्या.ञ्च पृथिवी.ञ्चाऽति जभ्रिषे- तव ज्योतींषि पवमान सूर्यः।।
卐 त्वं पवित्रे रजसो विधर्मणि- देवेभ्य.स्सोम पवमान पूयसे। त्वा.मुशिजः प्रथमा^ अगृभ्णत- तुभ्येमा विश्वा भुवनानि येमिरे।।
❀07.03.18 卐प्र रेभ^ ए.त्यति वार.मव्ययँ- वृषा वने.ष्वव चक्रद.द्धरिः। स.न्धीतयो वावाशाना^ अनूषत- शिशुं रिहन्ति मतयः पनिप्नतम्।।
卐 स^ सूर्यस्य रश्मिभिः परि व्यत- तन्तु.न्तन्वान.स्त्रिवृतँ यथा विदे। नय.न्नृतस्य प्रशिषो नवीयसीः- पति.र्जनीना.मुप याति निष्कृतम्।।

卐 राजा सिन्धूनां पवते पति.र्दिव^- ऋतस्य याति पथिभि꞉ कनिक्रदत्।
सहस्रधार꞉ परि षिच्यते हरि꞉- पुनानो वाच.ञ्जनय.न्नुपावसुः।।
卐 पवमान म.ह्यर्णो वि धावसि- सूरो न चित्रो अव्ययानि पव्यया।
गभस्तिपूतो नृभि.रद्रिभि.स्सुतो- महे वाजाय धन्याय धन्वसि।।
卐 इष.मूर्जं पवमानाऽभ्यर्षसि- श्येनो न वंसु कलशेषु सीदसि। इन्द्राय मद्वा
मद्यो मद.स्सुतो- दिवो विष्टम्भ^ उपमो विचक्षणः।।
❀07.03.19 卐सप्त स्वसारो अभि मातर.श्शिशु.-न्नव.ञ्जज्ञान.ञ्जेन्यँ
विपश्चितम्। अपा.ङ्गन्धर्व.न्दिव्य.न्नृचक्षसं- सोमँ विश्वस्य भुवनस्य राजसे।।
卐 ईशान^ इमा भुवनानि वीयसे- युजान^ इन्दो~ हरित.स्सुपर्ण्यः। ता.स्ते
क्षरन्तु मधुम.द्धृतं पय.-स्तव व्रते सोम तिष्ठन्तु कृष्टयः।।
卐 त्व.न्नृचक्षा^ असि सोम विश्वत꞉- पवमान वृषभ ता वि धावसि। स^ न꞉
पवस्व वसुम.द्धिरण्यव.-द्वयं स्याम भुवनेषु जीवसे।।
卐 गोवि.त्पवस्व वसुवि.द्धिरण्यवि.-द्रेतोधा^ इन्दो~ भुवने.ष्वर्पितः। त्वं
सुवीरो असि सोम विश्ववि.-त्त.न्त्वा विप्रा^ उप गिरेम आसते।।
卐 उ.न्मध्व^ ऊर्मि.र्वनना^ अतिष्ठिप.-दपो वसानो महिषो वि गाहते। राजा
पवित्ररथो वाज.माऽरुह.-त्सहस्रभृष्टि.र्जयति श्रवो बृहत्।।
❀07.03.20 卐स^ भन्दना^ उ.दियर्ति प्रजावती.-
र्विश्वाऽऽयु.र्विश्वा.स्सुभरा^ अहर्दिवि। ब्रह्म प्रजाव.द्रयि.मश्वपस्त्यं- पीत^
इन्द.विन्द्र. मस्मभ्यँ याचतात्।।

卐 सो अग्रे अह्नां हरि.र्हर्यतो मद॰- प्र चेतसा चेतयते अनु द्युभिः। द्वा जना यातय.न्नन्त.रीयते- नरा च शंस.न्दैव्य.ञ्च धर्तरि।। (ईयते, नराशंसम्, च, दैव्यम्)

卐 अञ्जते व्यञ्जते स.मञ्जते- क्रतुं रिहन्ति मधुनाऽभ्यञ्जते। सिन्धो.रुच्छ्वासे पतयन्त.मुक्षणं- हिरण्यपावा॰ पशु.मासु गृभ्णते।।

卐 विपश्चिते पवमानाय गायत- मही न धाराऽत्यन्धो अर्षति। अहि.र्न जूर्णा. मति सर्पति त्वच.-मत्यो न क्रीळ.न्नसर.द्वृषा हरिः।।

卐 अग्रेगो राजाऽप्य.स्तविष्यते- विमानो अह्नां भुवने.ष्वर्पितः। हरि.र्घृतस्नु. स्सुदृशीको अर्णवो- ज्योती^रथ॰ पवते राय ओक्यः।।

❀07.03.21 卐असर्जि स्कम्भो दिव^ उद्यतो मद॰- परि त्रिधातु.र्भुवना. न्यर्षति। अंशुं रिहन्ति मतय॰ पनिप्नत.-ङ्गिरा यदि निर्णिज.मृग्मिणो ययुः।।

卐 प्र ते धारा^ अ.त्यण्वानि मेष्य॰- पुनानस्य सँयतो यन्ति रंहयः। य.द्गोभि.रिन्दो~ चम्वो.स्समज्यस- आ सुवान.स्सोम कलशेषु सीदसि।।

卐 पवस्व सोम क्रतुवि.न्न^ उक्थ्यो-ऽव्यो वारे परि धाव मधु प्रियम्। जहि विश्वा.न्रक्षस^ इन्दो~ अत्रिणो- बृह.द्वदेम विदथे सुवीराः।।

9.89 **प्र तु द्रवेति नवर्चस्य सूक्तस्य, काव्य^ उशना पवमान.स्सोम- स्त्रिष्टुप्।**

❀07.03.22 卐प्र तु द्रव परि कोश.न्नि षीद- नृभि॰ पुनानो अभि वाज.
मर्ष। अश्व.न्न त्वा वाजिनं मर्जयन्तो-ऽच्छा बर्ही^ रशनाभि.र्नयन्ति।।

卐 स्वायुध॰ पवते देव^ इन्दु.-रशस्तिहा वृजनं रक्षमाणः। पिता
देवाना.ञ्जनिता सुदक्षो- विष्टम्भो दिवो धरुण॰ पृथिव्याः।।

卐 ऋषि.र्विप्र॰ पुर^एता जनाना.-मृभु.र्धीर^ उशना काव्येन। स^ चि.द्विवेद
निहितँ य.दासा.-मपीच्य1(अ).ङ्गुह्य.न्नाम गोनाम्।।

卐 एष^ स्य^ ते मधुमा॰ इन्द्र सोमो- वृषा वृष्णे परि पवित्रे अक्षाः‘।
सहस्रसा. श्शतसा^ भूरिदावा- शश्वत्तमं बर्हि.रा वा.ज्यस्थात्।।

卐 एते सोमा^ अभि गव्या सहस्रा- महे वाजायाऽमृताय श्रवांसि। पवित्रेभि॰
पवमाना^ असृग्र.-न्छ्रवस्यवो न पृतनाजो अत्याः।।

❀07.03.23 卐परि हि ष्मा पुरुहूतो जनानाँ- विश्वाऽसर.द्भोजना
पूयमानः। अथाऽऽ भर श्येनभृत प्रयांसि- रयिन्तुञ्जानो अभि वाज.मर्ष।।

卐 एष^ सुवान॰ परि सोम॰ पवित्रे- सर्गो न सृष्टो अदधाव.दर्वा। तिग्मे~
शिशानो महिषो न श्रृङ्गे~- गा^ गव्य.न्नभि शूरो न सत्वा।।

卐 एषाऽऽ ययौ परमा.दन्त.रद्रे॰- कूचि.त्सती.रूर्वे गा^ विवेद। दिवो न
विद्यु. त्स्तनय.न्त्यभ्रै.-स्सोमस्य ते पवत इन्द्र धारा।।

卐 उत स्म राशिं परि यासि गोना.-मिन्द्रेण सोम सरथं पुनानः। पूर्वी.रिषो
बृहती.र्जीरदानो~- शिक्षा शचीव.स्तव ता^ उपष्टुत्।।

9.90 अयं सोम^ इत्यष्टर्चस्य सूक्तस्य, काव्य^ उशना पवमान.स्सोम. त्रिष्टुप्।

07.03.24 अयं सोम^ इन्द्र तुभ्यं सुन्वे- तुभ्यं पवते त्व.मस्य पाहि। त्वं ह य.ञ्चकृषे त्वँ ववृष- इन्दुं मदाय युज्याय सोमम्।।

स^ ईं रथो न भुरिषा.ळयोजि- महः पुरूणि सातये वसूनि। आ.दीँ विश्वा नहुष्याणि जाता- स्वर्षाता वन ऊर्ध्वा नवन्त।।

वायु.र्न यो नियुत्वाँ इष्टयामा- नासत्येव हव आ शम्भविष्ठः। विश्ववारो द्रविणोदा^इव त्म-न्पूषेव धीजवनोऽसि सोम।।

इन्द्रो न यो महा कर्माणि चक्रि.-र्हन्ता वृत्राणा.मसि सोम पूर्भित्। पैद्वो न हि त्व.महिनाम्नां- हन्ता विश्वस्याऽसि सोम दस्योः।।

अग्नि.र्न यो वन आ सृज्यमानो- वृथा पाजांसि कृणुते नदीषु। जनो न युध्वा महत^ उपब्दि.-रियर्ति सोमः पवमान^ ऊर्मिम्।।

एते सोमा^ अति वारा.ण्यव्या- दिव्या^ न कोशासो अभ्रवर्षाः। वृथा समुद्रं सिन्धवो न नीची.-स्सुतासो अभि कलशाँ असृग्रन्न्।।

शुष्मी शर्धो न मारुतं पवस्वा-ऽनभिशस्ता दिव्या यथा विट्। आपो न मक्षू सुमति.र्भवा न.-स्सहस्राप्साः पृतनाषा.ण्ण यज्ञः।।

राज्ञो नु ते वरुणस्य व्रतानि- बृह.द्गभीर.न्तव सोम धाम। शुचि.ष्ट्व.मसि प्रियो न मित्रो- दक्षाय्यो अर्यमेवाऽसि सोम।।

☸ 9.91 प्रो स्य वह्विरिति सप्तर्चस्य सूक्तस्य, काव्य उशना- पवमान. स्सोम.स्त्रिष्टुप्।

❀07.03.25 卐प्रो~ स्य^ वह्निः पथ्याभि.रस्या.-न्दिवो न वृष्टिः पवमानो अक्षाः'। सहस्रधारो असद्.न्न्य1(अ)स्मे~- मातु.रुपस्थे वन आ च सोमः।।

卐 राजा सिन्धूना.मवसिष्ट वास^- ऋतस्य नाव.माऽरुह.द्रजिष्ठाम्। अप्सु द्रप्सो वावृधे श्येनजूतो- दुह ईं पिता दुह ईं पितु.र्जाम्।।

卐 सिंह.न्नसन्त मध्वो अयासं- हरि. मरुष.न्दिवो अस्य पतिम्। शूरो युत्सु प्रथमः पृच्छते गा^- अस्य चक्षसा परि पा.त्युक्षा।।

卐 मधुपृष्ठ.ङ्घोर.मयास. मश्वं- रथे युञ्ज.न्त्युरुचक्र ऋष्वम्। स्वसार^ ई.ञ्जामयो मर्जयन्ति- सनाभयो वाजिन.मूर्जयन्ति।।

卐 चतस्र^ ई.ङ्घृतदुह.स्सचन्ते- समाने अन्त.र्धरुणे नि¤षत्ताः। ता^ ई.मर्षन्ति नमसा पुनाना.-स्ता^ ईं विश्वतः परि ¤षन्ति पूर्वीः।।

卐 विष्टम्भो दिवो धरुणः पृथिव्या^- विश्वा^ उत क्षितयो हस्ते अस्य। अस.त्त उत्सो गृणते नियुत्वा.-न्मध्वो अंशुः पवत इन्द्रियाय।।

卐 वन्व.न्नवातो अभि देववीति.-मिन्द्राय सोम वृत्रहा पवस्व। शग्धि महः पुरुश्चन्द्रस्य राय.-स्सुवीर्यस्य पतय.स्स्याम।।

☸ 9.92 प्र हिन्वान^ इति षळृचस्य सूक्तस्य, मैत्रावरुणि. र्वसिष्ठः- पवमान. सोम-स्त्रिष्टुप्।

❀07.03.26 卐प्र हिन्वानो जनिता रोदस्यो^- रथो न वाजं सनिष्य.न्नयासीत्। इन्द्र.ङ्गच्छ.न्नायुधा संशिशानो- विश्वा वसु हस्तयो.रादधानः।।

卐 अभि त्रिपृष्ठँ वृषणँ वयोधा.-माङ्गूषाणा.मवावशन्त वाणीः। वना वसानो वरुणो न सिन्धू.-न्वि रत्नधा^ दयते वार्याणि।।

卐 शूरग्राम.स्सर्ववीर.स्सहावा.-न्जेता पवस्व सनिता धनानि। तिग्मा॒ऽयुधः≈ क्षिप्रधन्वा सम.-त्स्वषाळ्ह.स्साह्वा.न्पृतनासु शत्रून्।।

卐 उरुगव्यूति.रभयानि कृण्व.-न्त्समीचीने~ आ पवस्वा पुरन्धी~। अप. ॰स्सिषास.न्नुषस. स्स्व1(अ).र्गा.-स्स.ञ्चिक्रदो महो अस्मभ्यँ वाजान्।।

卐 मत्सि सोम वरुणं मत्सि मित्रं- मत्सीन्द्र.मिन्दो~ पवमान विष्णुम्। मत्सि शर्धो मारुतं मत्सि देवा.-न्मत्सि महा.मिन्द्र.मिन्दो~ मदाय।।

卐 एवा राजेव क्रतुमा॰ अमेन- विश्वा घनिघ्न.दुरिता पवस्व। इन्दो~ सूक्ताय वचसे वयो धा^- यूयं पात स्वस्तिभि.स्सदा नः।। इति तृतीयाध्याय स्समाप्तः।।

## सप्तमाष्टके चतुर्थाध्यायः (वर्गाः 1-28)

**9.93 असर्जीति षळृचस्य सूक्तस्य, मारीचः कश्यपः पवमानस्सोम- स्त्रिष्टुप्।**

❀07.04.01 卐असर्जि वक्वा रथ्ये यथा॒ऽजौ- धिया मनोता प्रथमो मनीषी। दश स्वसारो अधि सानो अव्ये-ऽजन्ति वह्निं सदना.न्यच्छ।।

卐 वीती जनस्य दिव्यस्य कव्यै.-रधि सुवानो नहुष्येभि.रिन्दुः। प्र यो नृभि.
रमृतो मर्त्यैभि.-र्मर्मृजानोऽविभि.र्गोभि.रद्भिः।।
卐 वृषा वृष्णे रोरुव.दंशु.रस्मै- पवमानो रुश.दीर्ते पयो गोः। सहस्र.मृक्का
पथिभि.र्वचोवि.-दध्वस्मभि.स्सूरो अण्वँ वि याति।।
卐 रुजा दृळ्हा चि.द्रक्षस.स्सदांसि- पुनान इन्द ऊर्णुहि वि वाजान्।
वृश्चोपरिष्टा.त्तुजता वधेन- ये अन्ति दूरा.दुपनाय.मेषाम्।।
卐 स प्रत्नव.न्नव्यसे विश्ववार- सूक्ताय पथः कृणुहि प्राचः। ये दुष्षहासो
वनुषा बृहन्त.-स्ताँ.स्ते अश्याम पुरुकृ.त्पुरुक्षो।।
卐 एवा पुनानो अप.स्स्व1(अ).र्गा- अस्मभ्य.न्तोका तनयानि भूरि।
श.न्नः क्षेत्र.मुरु ज्योतींषि सोम-ज्यो.ङ्.स्सूर्य.न्दृशये रिरीहि।।

9.94 **परि सुवान इति षळृचस्य सूक्तस्य, मारीचः कश्यपः पवमान.स्सोम. स्त्रिष्टुप्।**

07.04.02 卐परि सुवानो हरि.रंशुः पवित्रे- रथो न सर्जि सनये
हियानः। आप.च्छ्लोक.मिन्द्रियं पूयमानः- प्रति देवाँ अजुषत प्रयोभिः।।
卐 अच्छा नृचक्षा असर.त्पवित्रे- नाम दधानः कवि.रस्य योनौ।
सीद.न्होतेव सदने चमूषूपे.-मग्म.न्नृषय.स्सप्त विप्राः।।
卐 प्र सुमेधा गातुवि.द्विश्वदेव.-स्सोमः पुनान.स्सद एति नित्यम्।
भुव.द्विश्वेषु काव्येषु रन्ता-ऽनु जना.न्यतते पञ्च धीरः।।

卐 तव त्ये सोम पवमान निण्ये- विश्वे देवा.स्त्रय^ एकादशासः। दश स्वधाभि. रधि सानो अव्ये- मृजन्ति त्वा नद्य.स्सप्त यह्वीः।।
卐 त.न्नु सत्यं पवमानस्याऽस्तु- यत्र विश्वे कारव.स्सन्नसन्त। ज्योति.र्य.दह्ने अकृणो.दु लोकं- प्राऽऽव.न्मनु.न्दस्यवे क.रभीकम्।।
卐 परि सद्मेव पशुमान्ति होता- राजा न सत्य.स्समिती.रियानः। सोमः पुनानः कलशाँ अयासी.-त्सीद.न्मृगो न महिषो वनेषु।।
9.95 **साकमुक्ष^ इति पञ्चर्चस्य सूक्तस्य, गौतमो नोधाः पवमानस्सोम-स्त्रिष्टुप्।**
❀07.04.03 卐साकमुक्षो मर्जयन्त स्वसारो- दश धीरस्य धीतयो धनुत्रीः। हरिः पर्यद्रव.ज्जा.स्सूर्यस्य- द्रोण.न्ननक्षे अत्यो न वाजी।।
卐 सं मातृभि.र्न शिशु.र्वावशानो- वृषा दधन्वे पुरुवारो अद्भिः। मर्यो न योषा.मभि निष्कृतँ य.-न्त्स.ङ्गच्छते कलश उस्त्रियाभिः।।
卐 उत प्र पिप्य ऊध.रघ्न्याया^- इन्दु.र्धाराभि.स्सचते सुमेधाः। मूर्धान.ङ्गावः पयसा चमू.-ष्वभि श्रीणन्ति वसुभि.र्न निक्तैः।।
卐 स^ नो देवेभिः पवमान र.-देन्दो~ रयि.मश्विनँ वावशानः। रथिरायता.मुशती पुरन्धि.-रस्मद्र्य1(अ).गा दावने वसूनाम्।।
卐 नू नो रयि.मुप मास्व नृवन्तं- पुनानो वाताप्यँ विश्वश्चन्द्रम्। प्र वन्दितु.रिन्दो~ ता.र्यायुः- प्रात.र्मक्षू धियावसु.र्जगम्यात्।।

☸ 9.96 **अधि यदिति पञ्चर्चस्य सूक्तस्य, घौरः कण्वः पवमान.स्सोम-त्रिष्टुप्।**

❀07.04.04 卐अधि य.दस्मि.न्वाजिनीव शुभ.-स्स्पर्धन्ते धिय.स्सूर्ये न विशः। अपो वृणानः पवते कवीय.-न्व्रज.न्न पशुवर्धनाय मन्म।।

卐 द्विता व्यूर्ण्व.न्नमृतस्य धाम- स्वर्विदे भुवनानि प्रथन्त। धियः पिन्वाना. स्स्वसरे न गाव^-ऋतायन्ती.रभि वावश्र इन्दुम्।।

卐 परि य.त्कविः काव्या भरते- शूरो न रथो भुवनानि विश्वा। देवेषु यशो मर्ताय भूष.-न्दक्षाय रायः पुरुभूषु नव्यः।।

卐 श्रिये जात.श्श्रिय आ नि.रियाय- श्रियँ वयो जरितृभ्यो दधाति। श्रियँ वसाना^ अमृतत्व.माय.-न्भवन्ति सत्या समिथा मितद्रौ।।

卐 इष.मूर्ज.मभ्य1(अ)र्षाऽश्व.ङ्गा.-मुरु ज्योतिः कृणुहि मत्सि देवान्। विश्वानि हि सुषहा तानि तुभ्यं- पवमान बाधसे सोम शत्रून्।।

☸ 9.97 **कनिक्रन्तीति पञ्चर्चस्य सूक्तस्य, कण्वः प्रस्कण्वः पवमान.स्सोम-त्रिष्टुप्।**

❀07.04.05 卐कनिक्रन्ति हरि.रा सृज्यमान.-स्सीद.न्वनस्य जठरे पुनानः। नृभि.र्यतः कृणुते निर्णिज.ङ्गा^- अतो मती.र्जनयत स्वधाभिः।।

卐 हरि.स्सृजानः पथ्या.मृत.-स्येयर्ति वाच.मरितेव नावम्। देवो देवाना.ङ्गुह्यानि नामा-ऽऽवि.ष्कृणोति बर्हिषि प्रवाचे।।

卐 अपामिवे.दूर्मय.स्स्तर्तुराणा॰- प्र मनीषा^ ईरते सोम.मच्छ। नमस्यन्ती.रुप च यन्ति स.ञ्चा-ऽऽच विश.न्त्युशती.रुशन्तम्।।
卐 तं मर्मृजानं महिष.न्न साना.-वंशु.न्दुह.न्त्युक्षण.ङ्गिरिष्ठाम्। तँ वावशानं मतय.स्सचन्ते- त्रितो बिभर्ति वरुणं समुद्रे।।
卐 इष्य.न्वाच.मुपवक्तेव होतु॰- पुनान^ इन्दो~ वि ष्या मनीषाम्। इन्द्र.श्च य.त्क्षयथ.स्सौभगाय- सुवीर्यस्य पतय.स्स्याम।।
9.98 **प्र सेनानी.रिति चतुर्विंश.त्यृचस्य सूक्तस्य, दैवोदासिः प्रतर्दनः- पवमान.स्सोम- स्त्रिष्टुप्।**
❀07.04.06 卐प्र सेनानी.श्शूरो अग्रे रथाना.-ङ्गव्य.न्नेति हर्षते अस्य सेना। भद्रा.न्कृण्व.न्निन्द्रहवा.न्त्सखिभ्य^- आ सोमो वस्त्रा रभसानि दत्ते।।
卐 स.मस्य हरिं हरयो मृज.-न्त्यश्वहयै.रनिशित.न्नमोभिः। आ तिष्ठति रथ.मिन्द्रस्य सखा- विद्वा॰ एना सुमतिँ या.त्यच्छ।।
卐 स^ नो देव देवताते पवस्व- महे सोम प्सरस इन्द्रपानः। कृण्व.न्नपो वर्षय.न्द्या.मुतेमा.-मुरो.रा नो वरिवस्या पुनानः।।
卐 अजीतयेऽहतये पवस्व- स्वस्तये सर्वतातये बृहते। त.दुशन्ति विश्व इमे सखाय.-स्त.दहँ वश्मि पवमान सोम।।
卐 सोम॰ पवते जनिता मतीना.-ञ्जनिता दिवो जनिता पृथिव्याः। जनिताऽग्ने. र्जनिता सूर्यस्य- जनि.तेन्द्रस्य जनि.तोत विष्णोः।।

❀07.04.07 卐ब्रह्मा देवानां पदवीः कवीना.-मृषि.र्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणां स्वधिति.र्वनानां- सोमः पवित्र.मत्येति रेभन्न्।।
卐 प्राऽवीविप.द्वाच ऊर्मि.न्न सिन्धु.-र्गिर. स्सोमः पवमानो मनीषाः। अन्तः‘ पश्य.न्वृजनेमाऽवरा.-ण्या तिष्ठति वृषभो गोषु जानन्न्।।
卐 स मत्सरः पृत्सु वन्व.न्नवात.-स्सहस्ररेता अभि वाज.मर्षे। इन्द्रायेन्दो~ पवमानो मनीष्य1-(अं)शो.रूर्मि.मीरय गा इषण्यन्न्।।
卐 परि प्रियः कलशे देववात- इन्द्राय सोमो रण्यो मदाय। सहस्रधार.श्शतवाज इन्दु.-र्वाजी न सप्ति.स्समना जिगाति।।
卐 स पूर्व्यो वसुवि.ज्जायमानो- मृजानो अप्सु दुदुहानो अद्रौ। अभिशस्तिपा भुवनस्य राजा- विद.द्गातुं ब्रह्मणे पूयमानः।।
❀07.04.08 卐त्वया हि नः पितर.स्सोम पूर्वे- कर्माणि चक्रुः पवमान धीराः। वन्व.न्नवातः परिधीं रपोर्णु- वीरेभि.रश्वै.र्मघवा भवा नः।।
卐 यथाऽपवथा मनवे वयोधा- अमित्रहा वरिवोवि.द्धविष्मान्। एवा पवस्व द्रविण.न्दधान- इन्द्रे स.न्तिष्ठ जनयाऽऽयुधानि।।
卐 पवस्व सोम मधुमां ऋतावा-ऽपो वसानो अधि सानो अव्ये। अव द्रोणानि घृतवान्ति सीद- मदिन्तमो मत्सर इन्द्रपानः।।
卐 वृष्टि. न्दिव.श्शतधारः पवस्व- सहस्रसा वाजयु.र्देववीतौ। सं सिन्धुभिः कलशे वावशान.-स्स.मुस्रियाभिः प्रतिर.न्न आयुः।।

卐 एष॑ स्य॑ सोमो मतिभिः पुनानो-ऽत्यो न वाजी तर.ती.दरातीः। पयो न दुग्ध.मदिते.रिषिर.-मुर्विव गातु.स्सुयमो न वोळ्हा॥

❀07.04.09 卐स्वायुध.स्सोतृभिः पूयमानो-ऽभ्यर्ष गुह्य.ञ्चारु नाम। अभि वाजं सप्तिरिव श्रवस्या-ऽभि वायु.मभि गा॑ देव सोम॥

卐 शिशु.ञ्जज्ञानं हर्यतं मृजन्ति- शुम्भन्ति वह्निं मरुतो गणेन। कवि.र्गीर्भिः काव्येना कवि.स्स.-न्त्सोमः पवित्र.मत्येति रेभन्न्॥

卐 ऋषिमना॑ य॑ ऋषिकृ.त्स्वर्षा.-स्सहस्रणीथः पदवीः कवीनाम्। तृतीय.न्धाम महिष स्सिषास.-न्त्सोमो विराज.मनु राजति ष्टुप्॥

卐 चमूष.च्छ्येन.श्शकुनो विभृत्वा- गोविन्दु.र्द्रप्स॑ आयुधानि बिभ्रत्। अपा. मूर्मिं सचमान.स्समुद्र.-न्तुरीय.न्धाम महिषो विवक्ति॥

卐 मर्यो न शुभ्र.स्तन्वं मृजानो-ऽत्यो न सृत्वा सनये धनानाम्। वृषेव यूथा परि कोश.मर्ष.-न्कनिक्रद.च्चम्वो3(ओ).रा विवेश॥

❀07.04.10 卐पवस्वेन्दो~ पवमानो महोभिः- कनिक्रद.त्परि वारा.ण्यर्ष। क्रीळ.ञ्चम्वो3(ओ).रा विश पूयमान॑- इन्द्र.न्ते रसो मदिरो ममत्तु॥

卐 प्राऽस्य धारा॑ बृहती.रसृग्र.-न्नक्तो गोभिः कलशा॒ आ विवेश। साम कृण्व.न्त्सामन्यो विपश्चि.-त्क्रन्द.न्ने.त्यभि सख्यु.र्न जामिम्॥

卐 अपघ्न.न्नेषि पवमान शत्रू.-न्प्रिया.न्न जारो अभिगीत॑ इन्दुः। सीद.न्वनेषु शकुनो न पत्वा- सोमः पुनानः कलशेषु सत्ता॥

卐 आ ते रुच॰ पवमानस्य सोम- योषेव यन्ति सुदुघा.स्सुधाराः। हरि.रानीत॰ पुरुवारो अ.-प्स्वचिक्रद.त्कलशे देवयूनाम्।।

षष्ठेऽनुवोके सप्तसूक्तानि

9.99 अस्य प्रेषे.त्यष्टपञ्चाश.द्दृचस्य सूक्तस्याऽऽद्यानां तिसृणां मैत्रावरुणि. र्वसिष्ठ.- श्चतुर्थ्यादि तिसृणां वासिष्ठ^ इन्द्रप्रमतिः, ततो द्वितीयादि नव तृचानां पवमान.स्सोम- स्त्रिष्टुप्, सप्तम्यादि तिसृणां वासिष्ठो वृषगणो- दशम्यादि तिसृणां वासिष्ठो मन्यु-स्त्रयोदश्यादि तिसृणां वासिष्ठ उपमन्युः, षोडश्यादि तिसृणां वासिष्ठो व्याघ्रपा-देकोनाविंश्यादि तिसृणां वासिष्ठ. श्शक्ति-द्वाविंश्यादि तिसृणां वासिष्ठः कर्णश्रु-त्पञ्चविंश्यादि तिसृणां वासिष्ठो मृळीको-ऽष्टाविंश्यादि तिसृणां वासिष्ठो वसुक्र^- एकत्रिंश्यादि चतुर्दशानां- शाक्त्यः पराशरः, पञ्चचत्वारिंश्यादि चतुर्दशाना.माङ्गिरसः कुत्स^ ऋषयः- पवमान स्सोम. स्त्रिष्टुप्।

07.04.11 卐अस्य प्रेषा हेमना पूयमानो- देवो देवेभि.स्स.मपृक्त रसम्। सुत॰ पवित्रं पर्येति रेभ-न्मितेव सद्म पशुमान्ति होता।।

卐 भद्रा वस्त्रा समन्या3(आ) वसानो- महा.न्कवि.र्निवचनानि शंसन्न्। आ वच्यस्व चम्वो॰ पूयमानो- विचक्षणो जागृवि.र्देववीतौ।।

卐 स.मु प्रियो मृज्यते सानो अव्ये- यशस्तरो यशसा.क्षैतो अस्मे~। अभि स्वर धन्वा पूयमानो- यूयं पात स्वस्तिभि.स्सदा नः।।

卐 प्र गायता॒ऽभ्यर्चाम दे॒वा.-न्त्सोमं हिनोत मह॒ते धनाय। स्वा॒दु॰ पवा॒ते
अति॒ वार॒.मव्य॒.-मा सीदाति क॒लश.न्दे॒व॒यु.र्नः।।
卐 इन्दु॒.र्दे॒वाना॒.मुप सख्य॒.माय॒.-न्त्सह॒स्रधार॰ पवते॒ मदाय।
नृ॒भि॒.स्स्तवा॒नो अनु॒ धाम॒ पूर्व॒.-मग॒.न्निन्द्रं मह॒ते सौभगाय।।
❀07.04.12 卐स्तो॒त्रे रा॒ये हरि॒.रर्षा पुना॒न^- इन्द्रं॒ मदो॒ गच्छतु॒ ते॒ भराय।
दे॒वै.र्याहि स॒रथं॒ राधो अच्छा - यूयं॒ पात स्व॒स्तिभि॒. स्सदा॒ नः।।
卐 प्र काव्य॒.मु॒शनेव ब्रुवा॒णो- दे॒वो दे॒वाना॒.ञ्जनि॒मा विवक्ति। महि॒व्रत॒.
श्शुचिबन्धु॰ पाव॒क॰- प॒दा व॒राहो अ॒भ्येति॒ रेभन्न्।।
卐 प्र हं॒सास॒.स्तृप॒लं म॒न्यु.मच्छा॒-ऽमा.द॒स्तँ वृष॒गणा^ अयासुः।
आ॒ङ्गू॒ष्य1(अं) पव॒मानं सखायो- दु॒र्मर्षं सा॒कं प्र व॒दन्ति वा॒णम्।।
卐 स रंहत उरुगा॒यस्य जू॒तिँ- वृथा॒ क्रीळन्तं मिमते॒ न गावः।
प॒री॒ण॒स.ङ्कृणुते ति॒ग्मश्रृङ्गो- दिवा॒ हरि॒.र्ददृशे॒ नक्त.मृज्रः।।
卐 इन्दु॒.र्वा॒जी पवते॒ गोन्योघा^- इन्द्रे॒ सोम.स्सह॒^ इन्व॒.न्मदाय। हन्ति॒ रक्षो॒
बाधते॒ प.र्यराती॒.-र्वरिव॰ कृ॒ण्व.न्वृज॒नस्य॒ राजा।।
❀07.04.13 卐अध॒ धारया॒ मध्वा॒ पृचा॒न.-स्ति॒रो रोम पवते॒ अद्रिदुग्धः।
इन्दु॒.रिन्द्रस्य स॒ख्य.ञ्जुषा॒णो- दे॒वो दे॒वस्य मत्स॒रो मदाय।।
卐 अ॒भि प्रि॒याणि पवते पुना॒नो- दे॒वो दे॒वा.न्त्स्वेन॒ रसेन पृ॒ञ्चन्न्।
इन्दु॒.र्धर्मा॒.ण्यृतु॒था वसा॒नो- दश॒ क्षिपो अव्यत॒ सानो॒ अव्ये।।

卐 वृषा शोणो अभिकनिक्रद.द्गा^- नदय.न्नेति पृथिवी.मुत द्याम्। इन्द्रस्येव वग्नु.रा शृण्व आजौ- प्रचेतय.न्नर्षति वाच.मेमाम्।।

卐 रसाय्यः पयसा पिन्वमान^- ईरय.न्नेषि मधुमन्त.मंशुम्। पवमान. स्सन्तनि.मेषि कृण्व.-न्निन्द्राय सोम परिषिच्यमानः।।

卐 एवा पवस्व मदिरो मदा.-योदग्राभस्य नमय.न्वधस्नैः। परि वर्णं भरमाणो रुशन्त.-ङ्गव्यु.र्नो अर्ष परि सोम सिक्तः।।

❀07.04.14 卐जुष्टी न^ इन्दो~ सुपथा सुगा.-न्युरौ पवस्व वरिवांसि कृण्वन्न्। घनेव विष्व.ग्दुरितानि विघ्न.-न्नधि ष्णुना धन्व सानो अव्ये।।

卐 वृष्टि.न्नो अर्ष दिव्या.ञ्जिगत्नु.-मिळावतीं शङ्गयी.ञ्जीरदानुम्। स्तुकेव वीता धन्वा विचिन्व.-न्बन्धूꣳ रिमाꣳ अवराꣳ इन्दो~ वायून्।।

卐 ग्रन्थि.न्न वि ष्य ग्रथितं पुनान^- ऋजु.ञ्च गातुं वृजिन.ञ्च सोम। अत्यो न क्रदो हरि.रा सृजानो- मर्यो देव धन्व पस्त्यावान्।।

卐 जुष्टो मदाय देवतात इन्दो~- परि ष्णुना धन्व सानो अव्ये। सहस्रधार. स्सुरभि.रदब्धः- परि स्रव वाजसातौ नृषह्ये।।

卐 अरश्मानो येऽरथा^ अयुक्ता^- अत्यासो न ससृजानास^ आजौ। एते शुक्रासो धन्वन्ति सोमा^- देवास.स्ताꣳ उप याता पिबध्यै।।

❀07.04.15 卐एवा न इन्दो~ अभि देववीतिं- परि स्रव नभो अर्ण.श्चमूषु। सोमो अस्मभ्य.ङ्काम्यं बृहन्तं- रयि.न्ददातु वीरवन्त.मुग्रम्।।

卐 तक्ष.द्यदी मनसो वेनतो वा.-ग्ज्येष्ठस्य वा धर्मणि क्षो.रनीके। आ.दी.माय. न्वर.मा वावशाना^- जुष्टं पति.ङ्कलशे गाव^ इन्दुम्।।

卐 प्र दानुदो दिव्यो दानुपिन्व^- ऋत.मृताय पवते सुमेधाः। धर्मा भुव. द्वृजन्यस्य राजा- प्र रश्मिभि.र्दशभि.र्भारि भूम।।

卐 पवित्रेभिः पवमानो नृचक्षा^- राजा देवाना.मुत मर्त्यानाम्। द्विता भुव.द्रयिपती^ रयीणा.-मृतं भर.त्सुभृत.ञ्चार्विन्दुः।।

卐 अर्वाँइव श्रवसे साति.म.-च्छेन्द्रस्य वायो.रभि वीति.मर्ष। स^ न.स्सहस्रा बृहती.रिषो दा^- भवा सोम द्रविणोवि.त्पुनानः।।

❀07.04.16 卐देवाऽव्यो नः परि॒षिच्यमानाः≈-क्षयं सुवीर.न्धन्वन्तु सोमाः। आयज्यव.स्सुमतिँ विश्ववारा^- होतारो न दिवियजो मन्द्रतमाः।।

卐 एवा देव देवताते पवस्व- महे सोम प्सरसे देवपानः। मह.श्चि.द्धि ष्मसि हिता.स्समर्ये- कृधि सुष्ठाने~ रोदसी~ पुनानः।।

卐 अश्वो न क्रदो वृषभि.र्युजान.-स्सिंहो न भीमो मनसो जवीयान्। अर्वाचीनैः पथिभि.र्ये रजिष्ठा^- आ पवस्व सौमनस.न्न इन्दो~।।

卐 शत.न्धारा^ देवजाता^ असृग्र.-न्त्सहस्र.मेनाः कवयो मृजन्ति। इन्दो~ सनित्र.न्दिव^ आ पवस्व- पुर^एताऽसि महतो धनस्य।।

卐 दिवो न सर्गा^ अससृग्र.मह्नां- राजा न मित्रं प्र मिनाति धीरः। पितु.र्न पुत्रः क्रतुभि.र्यतान^- आ पवस्व विशे अस्या अजीतिम्।।

❀07.04.18 卐प्र ते धारा^ मधुमती.रसृग्र.-न्वारा.न्य.त्पूतो अत्ये.ष्यव्यान्। पवमान पवसे धाम गोना.-ञ्जज्ञान.स्सूर्य.मपिन्वो अर्कैः।।

卐 कनिक्रद्.दनु पन्था.मृतस्य- शुक्रो वि भा.स्यमृतस्य धाम। स^ इन्द्राय पवसे मत्सरवा.-न्हिन्वानो वाचं मतिभिः कवीनाम्।।

卐 दिव्य.स्सुपर्णोऽव चक्षि सोम- पिन्व.न्धाराः कर्मणा देववीतौ। एन्दो.विश कलशं सोमधान.-ङ्क्रन्द.न्निहि सूर्यस्योप रश्मिम्।।

卐 तिस्रो वाच^ ईरयति प्र वह्निर्- ऋतस्य धीतिं ब्रह्मणो मनीषाम्। गावो यन्ति गोपतिं पृच्छमाना.-स्सोमँ यन्ति मतयो वावशानाः।।

卐 सोम.ङ्गावो धेनवो वावशाना.-स्सोमँ विप्रा^ मतिभिः पृच्छमानाः। सोम.स्सुतः पूयते अज्यमान.-स्सोमे अर्का.स्त्रिष्टुभ.स्स.न्नवन्ते।।

❀07.04.18 卐एवा न.स्सोम परिषिच्यमान^- आ पवस्व पूयमान.स्स्वस्ति। इन्द्र.मा विश बृहता रवेण- वर्धया वाच.ञ्जनया पुरन्धिम्।।

卐 आ जागृवि.र्विप्र^ ऋता मतीनां- सोमः पुनानो असद.च्चमूषु। सपन्ति यं मिथुनासो निकामा^- अध्वर्यवो रथिरास.स्सुहस्ताः।।

卐 स^ पुनान^ उप सूरे न धातो-ऽभे~ अप्रा^ रोदसी~ वि ष^ आवः'। प्रिया चि.द्यस्य प्रियसास^ ऊती- स^ तू धन.ङ्कारिणे न प्र यंसत्।। (धाता,आ,उभे इति)

卐 स^ वर्धिता वर्धनः पूयमान.-स्सोमो मीढ्वाँ अभि नो ज्योतिषाऽवीत्। येना नः पूर्वे पितरः पदज्ञा.-स्स्वर्विदो अभि गा^ अद्रि.मुष्णन्।।

卐 अक्रा.न्त्समुद्र॰ प्रथमे विधर्म.-न्जनय.न्प्रजा^ भुवनस्य राजा। वृषा पवित्रे अधि सानो अव्ये- बृह.त्सोमो वावृधे सुवान^ इन्दुः।।

❀07.04.19 卐मह.त्त.त्सोमो महिष.श्चकारा-ऽपाँ य.द्गर्भोऽवृणीत देवान्। अदधा.दिन्द्रे पवमान^ ओजो-ऽजनय.त्सूर्ये ज्योति.रिन्दुः।।

卐 मत्सि वायु.मिष्टये राधसे च- मत्सि मित्रावरुणा पूयमानः। मत्सि शर्धो मारुतं मत्सि देवा.-न्मत्सि द्यावापृथिवी~ देव सोम।।

卐 ऋजु॰ पवस्व वृजिनस्य हन्ता-ऽपाऽमीवां बाधमानो मृध.श्च। अभिश्रीण.न्पय॰ पयसाऽभि गोना.-मिन्द्रस्य त्व.न्तव वयं सखायः।।

卐 मध्व.स्सूदं पवस्व वस्व^ उत्सँ- वीर.ञ्च न^ आ पवस्वा भग.ञ्च। स्वदस्वेन्द्राय पवमान इन्दो~- रयि.ञ्च न^ आ पवस्वा समुद्रात्।।

卐 सोम.स्सुतो धारयाऽत्यो न हित्वा- सिन्धु.र्न निम्न.मभि वाज्यक्षाः’। आ योनिँ वन्य.मसद.त्पुनान.-स्स.मिन्दु.र्गोभि.रसर.त्स.मद्भिः।।

❀07.04.20 卐एष^ स्य^ ते पवत इन्द्र सोम.-श्चमूषु धीर^ उशते तवस्वान्। स्वर्चक्षा^ रथिर.स्सत्यशुष्म॰- कामो न यो देवयता.मसर्जि।।

卐 एष^ प्रत्नेन वयसा पुनान.-स्तिरो वर्पांसि दुहितु.र्दधानः। वसान.श्शर्म त्रिवरूथ.मप्सु- होतेव याति समनेषु रेभन्न्।।

卐 नू न.स्त्वं रथिरो देव सोम- परि स्रव चम्वो॰ पूयमानः। अप्सु स्वादिष्ठो मधुमा॰ ऋतावा- देवो न य.स्सविता सत्यमन्मा।।

卐 अभि वायुं वी.त्यर्षा गृणानो3(ओ)-ऽभि मित्रावरुणा पूयमानः। अभी नर. न्धीजवनं रथेष्ठा.-मभीन्द्रँ वृषणँ वज्रबाहुम्।।

卐 अभि वस्त्रा सुवसना.न्यर्षा-ऽभि धेनू.स्सुदुघाः पूयमानः। अभि चन्द्रा भर्तवे नो हिरण्या-ऽभ्यश्वा.न्रथिनो देव सोम।।

❀07.04.21 卐अभी नो अर्ष दिव्या वसू.-न्यभि विश्वा पार्थिवा पूयमानः। अभि येन द्रविण.मश्नवामा-ऽभ्यार्षेय.ञ्जमदग्निव.न्नः।।

卐 अया पवा पवस्वैना वसूनि- माँश्चत्व इन्दो~ सरसि प्र धन्व। ब्रध्न.श्चि.दत्र वातो न जूतः- पुरुमेध.श्चि.त्तकवे नर.न्दात्।।

卐 उत न^ एना पवया ऽऽपवस्वा-ऽधि श्रुते श्रवाय्यस्य तीर्थे। षष्टिं सहस्रा नैगुतो वसूनि- वृक्ष.न्न पक्व.न्धूनव.द्रणाय।।

卐 महीमे~ अस्य वृषनाम शूषे~- माँश्चत्वे वा पृशने वा वधत्रे~। अस्वापय. न्निगुत.स्स्नेहय.च्चा.-ऽपाऽमित्राँ अपाऽचितो अचेतः।।(अप,अचितः,अच, इतः)

卐 स.न्त्री पवित्रा वितता.न्ये.-ष्य.न्वेक.न्धावसि पूयमानः। असि भगो असि दात्रस्य दाता-ऽसि मघवा मघवद्भ्य^ इन्दो~।।

❀07.04.22 卐एष^ विश्ववि.त्पवते मनीषी- सोमो विश्वस्य भुवनस्य राजा। द्रप्साँ ईरय.न्विदथे.ष्विन्दु.-र्वि वार.मव्यं समयाऽति याति।।

卐 इन्दुं रिहन्ति महिषा^ अदब्धाः- पदे रेभन्ति कवयो न गृध्राः। हिन्वन्ति धीरा^ दशभिः≈ क्षिपाभि.-स्स.मञ्जते रूप.मपां रसेन।।

卐 त्वया वयं पवमानेन सोम- भरे कृतँ वि चिनुयाम शश्वत्। त.न्नो मित्रो वरुणो मामहन्ता.-मदिति.स्सिन्धुः पृथिवी उत द्यौः।।

9.100 अभि न इति द्वादशर्चस्य सूक्तस्याऽम्बरीष ऋजिश्वानौ- पवमान.स्सोमो-ऽनुष्टु-बेकादशी बृहती।

❀07.04.23 卐अभि नो वाजसातमं- रयि.मर्ष पुरुस्पृहम्। इन्दो~ सहस्रभर्णस.-न्तुविद्युम्नँ विभ्वासहम्।।

卐 परि ष्य सुवानो अव्ययं- रथे न वर्माऽव्यत। इन्दु.रभि द्रुणा हितो- हियानो धाराभि.रक्षाः।।

卐 परि ष्य सुवानो अक्षा- इन्दु.रव्ये मदच्युतः। धारा य ऊर्ध्वो अध्वरे- भ्राजा नैति गव्ययुः।।

卐 स हि त्व.न्देव शश्वते- वसु मर्ताय दाशुषे। इन्दो~ सहस्रिणं रयिं- शताऽऽत्मानँ विवाससि।।

卐 वय.न्ते अस्य वृत्रह.-न्वसो~ वस्वः पुरुस्पृहः। नि नेदिष्ठतमा इष.- स्स्याम सुम्नस्याऽध्रिगो~।।

卐 द्वि.र्यं पञ्च स्वयशसं- स्वसारो अद्रिसंहतम्। प्रिय.मिन्द्रस्य काम्यं- प्रस्नापय.न्त्यूर्मिणम्।।

❀07.04.24 卐परि त्यं हर्यतं हरिं- बभ्रुं पुनन्ति वारेण। यो देवा.न्विश्वाँ इ.त्परि- मदेन सह गच्छति।।

卐 अस्य वो ह्यवसा- पान्तो दक्षसाधनम्। य.स्सूरिषु श्रवो बृह.-द्दधे स्व1(अ).र्ण हर्यतः।।

卐 स^ वाँ यज्ञेषु मानवी~- इन्दु.र्जनिष्ट रोदसी~। देवो देवी~ गिरि¤ष्ठा^- अस्रेध.न्त.न्तुवि¤ष्वणि।।

卐 इन्द्राय सोम पातवे- वृत्रघ्ने परि ¤षिच्यसे। नरे च दक्षिणावते- देवाय सदनासदे।।

卐 ते प्रत्नासो व्युष्टिषु- सोमाः पवित्रे अक्षरन्न्। अपप्रोथन्त.स्सनुत.र्हुरश्चितः- प्रात.'स्ताँ अप्रचेतसः।।

卐 तं सखायः पुरोरुचँ- यूयँ वय.ञ्च सूरयः। अश्याम वाजगन्ध्यं- सनेम वाजपस्त्यम्।।

9.101 आ हर्यताये.त्यष्टर्चस्य सूक्तस्य, काश्यपौ रेभसूनू- पवमान.स्सोमोऽनुष्टु-बाद्या बृहती।

❀07.04.25 卐आ हर्यताय धृष्णवे- धनु.स्तन्वन्ति पौंस्यम्। शुक्राँ वय.न्त्यसुराय निर्णिजँ- विपा.मग्रे महीयुवः।।

卐 अध क्षपा परिष्कृतो- वाजाँ अभि प्र गाहते। यदी विवस्वतो धियो- हरिं हिन्वन्ति यातवे।।

卐 त.मस्य मर्जयामसि- मदो य^ इन्द्रपातमः। य.ङ्गाव^ आसभि.र्दधुः- पुरा नून.ञ्च सूरयः।।

卐 त.ङ्गाथया पुराण्या- पुनान.मभ्यनूषत। उतो~ कृपन्त धीतयो-
देवाना.न्नाम बिभ्रतीः।।
卐 त.मुक्षमाण.मव्यये- वारे पुनन्ति धर्णसिम्। दूत.न्न पूर्वचित्तय- आ
शासते मनीषिणः।।
❀07.04.2 卐स^ पुनानो मदिन्तम.-स्सोम.श्चमूषु सीदति। पशौ न रेत^
आदध.-त्पति.र्वचस्यते धियः।।
卐 स^ मृज्यते सुकर्मभि.-र्देवो देवेभ्य.स्सुतः। विदे य.दासु सन्ददि.-
र्महीः.रपो वि गाहते।।
卐 सुत^ इन्दो~ पवित्र आ- नृभि.र्यतो वि नीयसे। इन्द्राय मत्सरिन्तम.-
श्चमू.ष्वा नि ॑षीदसि।।
9.102 **अभी नवन्त इति नवर्चस्य सूक्तस्य, काश्यपौ रेभसूनू-**
**पवमान.स्सोमोऽनुष्टुप्।**
❀07.04.27 卐अभी नवन्ते अद्रुहः- प्रिय.मिन्द्रस्य काम्यम्। वत्स.न्न पूर्व
आयुनि- जातं रिहन्ति मातरः।।
卐 पुनान^ इन्द.वा भर- सोम द्विबर्हसं रयिम्। त्वँ वसूनि पुष्यसि- विश्वानि
दाशुषो गृहे।।
卐 त्व.न्धियं मनोयुजं- सृजा वृष्टि.न्न तन्यतुः। त्वँ वसूनि पार्थिवा- दिव्या च
सोम पुष्यसि।।

卐 परि ते जिग्युषो यथा- धारा सुतस्य धावति। रंहमाणा व्य1(अ)व्ययँ- वारँ वाजीव सानसिः।।

卐 क्रत्वे दक्षाय नः कवे- पवस्व सोम धारया। इन्द्राय पातवे सुतो- मित्राय वरुणाय च।।

❀07.04.28 卐पवस्व वाजसातमः- पवित्रे धारया सुतः। इन्द्राय सोम विष्णवे- देवेभ्यो मधुमत्तमः।।

卐 त्वां रिहन्ति मातरो- हरिं पवित्रे अद्रुहः। वत्स.ञ्जात.न्न धेनवः- पवमान विधर्मणि।।

卐 पवमान महि श्रव.-श्चित्रेभि.र्यासि रश्मिभिः। शर्ध.न्तमांसि जिघ्नसे- विश्वानि दाशुषो गृहे।।

卐 त्व.न्द्या.ञ्च महिव्रत- पृथिवी.ञ्चाऽति जभ्रिषे। प्रति द्रापि.ममुञ्चथाः- पवमान महित्वना।। इति चतुर्थोध्याय स्समाप्तः।।

**सप्तमाष्टके पञ्चमाध्यायः (वर्गाः 1-33)**

9.103 पुरोजितीति षोळशर्चस्य सूक्तस्याऽऽद्यानां तिसृणां श्यावाश्वि. रन्धीगु.-श्चतुर्थ्यादि तिसृणां नाहुषो ययातिः- सप्तम्यादि तिसृणां मानवो नहुषो- दशम्यादि तिसृणां सांवरणो मनु-स्त्रयोदश्यादि चतसृणां वैश्वामित्रः प्रजापतिः- पवमान.स्सोमोऽनुष्टु-ब्द्वितीया.तृतीये गायत्र्यौ।

❀07.05.01 卐पुरोजिती वो अन्धस.-स्सुताय मादयित्नवे। अप श्वानं श्नथिष्टन- सखायो दीर्घजिह्व्यम्।।

卐 यो धारया पावकया- परिप्रस्यन्दते सुतः। इन्दु.रश्वो न कृत्व्यः।।

卐 त.न्दुरोष.मभी नर.-स्सोमँ विश्वाच्या धिया। यज्ञं हिन्व.न्त्यद्रिभिः।।

卐 सुतासो मधुमत्तमा.-स्सोमा^ इन्द्राय मन्दिनः। पवित्रवन्तो अक्षर.-न्देवा. न्गच्छन्तु वो मदाः।।

卐 इन्दु.रिन्द्राय पवत- इति देवासो अब्रुवन्न्। वाच.स्पति.र्मखस्यते- विश्व.स्येशान^ ओजसा।।

❀07.05.02 卐सहस्रधारः पवते- समुद्रो वाचमीङ्खयः। सोमः पती^ रयीणां- सखेन्द्रस्य दिवेदिवे।।

卐 अयं पूषा रयि.र्भग.-स्सोमः पुनानो अर्षति। पति.र्विश्वस्य भूमनो- व्यख्य. द्रोदसी~ उभे~।।

卐 स.मु प्रिया^ अनूषत- गावो मदाय घृष्वयः। सोमासः कृण्वते पथः- पवमानास^ इन्दवः।।

卐 य^ ओजिष्ठ.स्त.मा भर- पवमान श्रवाय्यम्। यः पञ्च चर्षणी.रभि- रयिँ येन वनामहै।।

卐 सोमाः पवन्त इन्दवो-ऽस्मभ्य.ङ्गातुवित्तमाः। मित्रा.स्सुवाना^ अरेपस.-स्स्वाध्य.स्स्वर्विदः।।

❀07.05.03 卐¤सुष्वाणासो व्यद्रिभि.-श्चिताना^ गो.रधि त्वचि। इष.मस्मभ्य. मभित.-स्स.मस्वर.न्वसुविदः।।

卐 एते पूता^ विपश्चित.-स्सोमासो दध्याशिरः। सूर्यासो न दर्शतासो-
जिगत्नवो ध्रुवा^ घृते।।
卐 प्र सुन्वानस्याऽन्धसो- मर्तो न वृत त.द्वचः। अप श्वान.मराधसं- हता
मख.न्न भृगवः।।
卐 आ जामि.रत्के अव्यत- भुजे न पुत्र^ ओण्योः। सर.ज्जारो न योषणाँ-
वरो न योनि.मासदम्।।
卐 स^ वीरो दक्षसाधनो- वि य.स्तस्तम्भ रोदसी~। हरिः पवित्रे अव्यत-
वेधा^ न योनि.मासदम्।।
卐 अव्यो वारेभिः पवते- सोमो गव्ये अधि त्वचि। कनिक्रद.द्वृषा हरि.-
रिन्द्रस्याऽभ्येति निष्कृतम्।।
9.104 क्राणा शिशु.रित्यष्टर्चस्य सूक्तस्याऽस्त्यस्त्रितः- पवमानस्सोम^-
उष्णिक्।
❀07.05.04 卐क्राणा शिशु.र्महीनां- हिन्व.न्नृतस्य दीधितिम्। विश्वा परि
प्रिया भुव.-द्ध द्विता।।
卐 उप त्रितस्य पाष्यो3(ओ).-रभक्त य.द्गुहा पदम्। यज्ञस्य सप्त धामभि.-
रध प्रियम्।।
卐 त्रीणि त्रितस्य धारया- पृष्ठे.ष्वेरया रयिम्। मिमीते अस्य योजना- वि
सुक्रतुः।। (पृष्ठेषु, आ, ईरय)

卐 जज्ञानं सप्त मातरो- वेधा.मशासत श्रिये। अय.न्ध्रुवो रयीणा.-श्चिकेत यत्।।

卐 अस्य व्रते सजोषसो- विश्वे देवासो अद्रुहः। स्पार्हा^ भवन्ति रन्तयो- जुषन्त यत्।।

❀07.05.05 卐य.मी गर्भ.मृतावृधो- दृशे चारु.मजीजनन्न्। कविं मंहिष्ठ. मध्वरे- पुरुस्पृहम्।।

卐 समीचीने~ अभि त्मना- यह्वी~ ऋतस्य मातरा। तन्वाना^ यज्ञ.मानुष.-ग्य.दञ्जते।।

卐 क्रत्वा शुक्रेभि.रक्षभिर्- ऋणो.रप व्रज.न्दिवः। हिन्व.न्नृतस्य दीधितिं- प्राऽध्वरे।।

9.105 प्र पुनानायेति षळृचस्य सूक्तस्याऽस्यो द्वितः- पवमान.स्सोम^- उष्णिक्।।

❀07.05.06 卐प्र पुनानाय वेधसे- सोमाय वच^ उद्यतम्। भृति.न्न भरा मतिभि.-र्जुजोषते।।

卐 परि वारा.ण्यव्यया- गोभि.रञ्जानो अर्षति। त्री षधस्था पुनानः- कृणुते हरिः।।

卐 परि कोशं मधुश्चुत.-मव्यये वारे अर्षति। अभि वाणीर् ऋषीणां- सप्त नूषत।।

卐 परि प्रणेता मतीनाँ- विश्वदेवो अदाभ्यः। सोमः पुनान.श्चम्वो.-र्विश.द्धरिः।।

卐 परि दैवी.रनु स्वधा^- इन्द्रेण याहि सरथम्। पुनानो वाघ.द्वाघद्धि-रमर्त्यः।।

卐 परि सप्ति.र्न वाजयु.-र्देवो देवेभ्य.स्सुतः। व्यानशिः पवमानो वि धावति।।

सप्तमेऽनुवाके एकादश सूक्तानि

9.106 सखाय^ इति षळृचस्य सूक्तस्य, काश्यपौ पर्वतनारदौ पवमान.स्सोम^ उष्णिक्। (शिखण्डिन्या. वप्सरसा. वृषिके-ऽत्र पाक्षिके, किञ्च पर्वतनारदौ काण्वा.वपि)।

07.05.07 卐सखाय^ आ नि षीदत- पुनानाय प्र गायत। शिशु.न्न यज्ञैः परि- भूषत श्रिये।।

卐 स.मी वत्स.न्न मातृभि.-स्सृजता गयसाधनम्। देवाऽव्यं1(अं) मद.मभि-द्विशवसम्।।

卐 पुनाता दक्षसाधनँ- यथा शर्धाय वीतये। यथा मित्राय वरुणाय-शन्तमः।।

卐 अस्मभ्य.न्त्वा वसुविद.-मभि वाणी.रनूषत। गोभि.ष्टे वर्ण.मभि-वासयामसि।।

卐 स॑ नो॒ मदानां पत- इन्दो॒~ दे॒वप्सरा॑ असि। सखे॒व सख्ये॒ गातु॒वित्तमो भव।।

卐 सनेमि कृध्य1(अ)स्म.दा- रक्षस.ङ्क.ञ्चि.दत्रिणम्। अपाऽदेव.न्द्वयु.मंहो-युयोधि नः।।

9.107 तं व॑ इति षळृचस्य सूक्तस्य, पर्वतनारदौ पवमानस्सोम॑ उष्णिक्।

❀07.05.08 卐तँ व.स्सखायो मदाय- पुनान.मभि गायत। शिशु.न्न यज्ञै. स्स्वदयन्त- गूर्तिभिः।।

卐 सँ वत्स॑इव मातृभि.-रिन्दु.र्हिन्वानो अज्यते। देवाऽवी.र्मदो मतिभि४-परिष्कृतः।।

卐 अय.न्दक्षाय साधनो-ऽयं शर्धाय वीतये। अय.न्देवेभ्यो मधुमत्तम. स्सुतः।।

卐 गोम.न्न॑ इन्दो~ अश्ववत्-त्सुत.स्सुदक्ष धन्व। शुचि.न्ते वर्ण.मधि- गोषु दीधरम्।।

卐 स॑ नो हरीणां पत- इन्दो~ देवप्सरस्तमः। सखेव सख्ये नर्यो- रुचे भव।।

卐 सनेमि त्व.मस्म.दाँ- अदेव.ङ्क.ञ्चि.दत्रिणम्। साह्वा४ इन्दो~ परि बाधो-अप द्वयुम्।।

9.108 **इन्द्रमच्छेति चतुर्दशर्चस्य सूक्तस्या-ऽऽद्यानां तिसृणां चाक्षुषोऽग्नि-श्चतुर्थ्यादि तिसृणां मानव.श्चक्षुः- सप्तम्यादि तिसृणा.माप्सवो मनु.-र्दशम्यादि पञ्चानां चाक्षुषो-ऽग्निः पवमान सोम^ उष्णिक्।**

❀07.05.09 卐इन्द्र.मच्छ सुता^ इमे- वृषणँ यन्तु हरयः। श्रुष्टी जातास^ इन्दव.स्स्वर्विदः।।

卐 अयं भराय सानसि.-रिन्द्राय पवते सुतः। सोमो जैत्रस्य चेतति- यथा विदे।।

卐 अस्ये.दिन्द्रो मदे.ष्वा- ग्राभ.ङ्गृभ्णीत सानसिम्। वज्र.ञ्च वृषणं भर.-त्स.मप्सुजित्।।

卐 प्र धन्वा सोम जागृवि.-रिन्द्रायेन्दो~ परि स्रव। द्युमन्तं शुष्म.मा भरा-स्वर्विदम्।।

卐 इन्द्राय वृषणं मदं- पवस्व विश्वदर्शतः। सहस्रयामा पथिकृ.द्विचक्षणः।।

❀07.05.10 卐अस्मभ्य.ङ्गातुवित्तमो- देवेभ्यो मधुमत्तमः। सहस्रँ याहि पथिभिः- कनिक्रदत्।।

卐 पवस्व देववीतय- इन्दो~ धाराभि.रोजसा। आ कलशं मधुमा.न्त्सोम-न.स्सदः।।

卐 तव द्रप्सा^ उदप्रुत^- इन्द्रं मदाय वावृधुः। त्वा.न्देवासो अमृताय- कं पपुः।।

卐 आ न.स्सुतास^ इन्दव॰- पुनाना^ धावता रयिम्। वृष्टिद्यावो रीत्याप.-स्स्वर्विदः।।

卐 सोम॰ पुनान^ ऊर्मिणा-ऽव्यो वारँ वि धावति। अग्रे वाच॰ पवमान॰ कनिक्रदत्।।

❀07.05.11 卐धीभि.र्हिन्वन्ति वाजिनँ- वने क्रीळन्त.मत्यविम्। अभि त्रिपृष्ठं मतय.-स्स.मस्वरन्न्।।

卐 असर्जि कलशा॰ अभि- मीळ्हे सप्ति.र्न वाजयुः। पुनानो वाच.ञ्जनय.न्नसि॰ष्यदत्।।

卐 पवते हर्यतो हरि.-रति ह्वरांसि रंह्या। अभ्यर्ष.न्स्तोतृभ्यो वीरव.द्यशः।।

卐 अया पवस्व देवयु.-र्मधो.र्धारा^ असृक्षत। रेभ.न्पवित्रं पर्यैषि विश्वतः।।

9.109 परीत इति षड्विंश.त्यृचस्य सूक्तस्य, बार्हस्पत्यो भरद्वाजो मारीचः कश्यपो राहूगणो गोतमो भौमोऽत्रि.र्गाथिनो विश्वामित्रो भार्गवो जमदग्नि. र्मैत्रावरुणि. र्वसिष्ठ ऋषयः, पवमान.स्सोमो देवता, आद्या चतुर्थी षष्ठ्यष्टमी नवमी दशमी चतुर्दश्य. स्सप्तदश्या.द्ययुजश्च बृहत्यः, द्वितीया पञ्चमी सप्त.म्येकादशी त्रयोदशी पञ्चदश्योऽष्टादश्यादि युजश्च सतो बृहत्यः, तृतीया षोडशी च द्विपदा विराट्।

❀07.05.12 卐परीतो षिञ्चता सुतं- सोमो य^ उत्तमं हविः। दधन्वा॰ यो नर्यो अप्स्व1(अ)न्त.रा- ॰सुषाव सोम.मद्रिभिः।। (परि, इतः, सिञ्चत)

卐 नूनं पुनानोऽविभिः परि स्रवा-ऽदब्ध.स्सुरभिन्तरः। सुते चि.त्त्वाऽप्सु मदामो अन्धसा- श्रीणन्तो गोभि.रुत्तरम्।।

卐 परि सुवान.श्चक्षसे देवमादनः- क्रतु.रिन्दु.र्विचक्षणः।।

卐 पुनान.स्सोम धारया-ऽपो वसानो अर्षसि। आ रत्नधा^ योनि.मृतस्य सीद.-स्युत्सो देव हिरण्ययः।।

卐 दुहान^ ऊध.र्दिव्यं मधु प्रियं- प्रत्नं सधस्थ.माऽसदत्। आपृच्छ्य.न्धरुणँ वा.ज्यर्षति- नृभि.र्धूतो विचक्षणः।।

❀07.05.13 卐पुनान.स्सोम जागृवि.-रव्यो वारे परि प्रियः। त्वँ विप्रो अभवोऽङ्गिरस्तमो- मध्वा यज्ञं मिमिक्ष नः।।

卐 सोमो मीढ्वा.न्पवते गातुवित्तम^- ऋषि.र्विप्रो विचक्षणः। त्व.ङ्कवि.रभवो देववीतम^- आ सूर्यं रोहयो दिवि।।

卐 सोम^ उ ꣡षुवाण.स्सोतृभि.-रधि ꣡ष्णुभि.रवीनाम्। अश्वयेव हरिता याति धारया- मन्द्रया याति धारया।।

卐 अनूपे गोमा.न्गोभि.रक्षा.'-स्सोमो दुग्धाभि.रक्षाः'। समुद्र.न्न सँवरणा. न्यग्म.-न्मन्दी मदाय तोशते।।

卐 आ सोम सुवानो अद्रिभि.-स्तिरो वारा.ण्यव्यया। जनो न पुरि चम्वो. र्विश.द्धरि.-स्सदो वनेषु दधिषे।।

❀07.05.14 卐स^ मामृजे तिरो अण्वानि मेष्यो- मीळ्हे सप्ति.र्न वाजयुः। अनुमाद्यः पवमानो मनीषिभि.-स्सोमो विप्रेभिर् ऋक्वभिः।।

卐 प्र सोम देववीतये- सिन्धु.र्न पिप्ये अर्णसा। अंशोः पयसा मदिरो न जागृवि.-रच्छा कोशं मधुश्चुतम्।।

卐 आ हर्यतो अर्जुने अत्के अव्यत- प्रिय.स्सूनु.र्न मर्ज्यः। त.मीं हिन्व.न्त्यपसो यथा रथ.-न्नदी.ष्वा गभस्त्योः।।

卐 अभि सोमास आयवः- पवन्ते मद्यं मदम्। समुद्रस्याऽधि विष्टपि मनीषिणो- मत्सरास.स्स्वर्विदः।।

卐 तर.त्समुद्रं पवमान ऊर्मिणा- राजा देव ऋतं बृहत्। अर्ष.न्मित्रस्य वरुणस्य धर्मणा- प्र हिन्वान ऋतं बृहत्।।

❀07.05.15 卐नृभि.र्येमानो हर्यतो विचक्षणो- राजा देव.स्समुद्रियः।।

卐 इन्द्राय पवते मद.-स्सोमो मरुत्वते सुतः। सहस्रधारो अ.त्यव्य.मर्षति- त.मी मृज.न्त्यायवः।।

卐 पुनान. श्चमू जनय.न्मति.ङ्कवि.-स्सोमो देवेषु रण्यति। अपो वसानः परि गोभि.रुत्तर.-स्सीद.न्वने.ष्वव्यत।।

卐 तवाऽहं सोम रारण- सख्य इन्दो दिवेदिवे। पुरूणि बभ्रो नि चरन्ति मा.मव परिधीः रति ताः इहि।।

卐 उताऽह.न्नक्त.मुत सोम ते दिवा- सख्याय बभ्र ऊधनि। घृणा तपन्त.मति सूर्यं पर.-श्शकुना इव पप्तिम।।

❀07.05.16 卐मृज्यमान.स्सुहस्त्य- समुद्रे वाच.मिन्वसि। रयिं पिशङ्गं बहुलं पुरुस्पृहं- पवमानाऽभ्यर्षसि।।

卐 मृजानो वारे पवमानो अव्यये- वृषाऽव चक्रदो वने। देवानां सोम पवमान निष्कृत.-ङ्गोभि.रञ्जानो अर्षसि।।

卐 पवस्व वाजसातये-ऽभि विश्वानि काव्या। त्वं समुद्रं प्रथमो वि धारयो-देवेभ्य.स्सोम मत्सरः।।

卐 स^ तू पवस्व परि पार्थिवं रजो- दिव्या च सोम धर्मभिः। त्वाँ विप्रासो मतिभि.र्विचक्षण- शुभ्रं हिन्वन्ति धीतिभिः।।

卐 पवमाना^ असृक्षत- पवित्र.मति धारया। मरुत्वन्तो मत्सरा^ इन्द्रिया^-हया- मेधा.मभि प्रयांसि च।।

卐 अपो वसान॰ परि कोश.मर्ष.-तीन्दु.र्हियान.स्सोतृभिः। जनय.न्ज्योति.र्मन्दना^ अवीवश.-द्गा॰ कृण्वानो न निर्णिजम्।।

9.110 पवस्वेति षोळशर्चस्य सूक्तस्य, आद्ययो.र्द्वयो. रशात्त्यो गौरिवीति,स्तृतीयाया वसिष्ठः शक्ति.,श्चतुर्थ्यादि द्वयो.राङ्गिरस^ उरुः, षष्ठ्यादि द्वयो. र्भारद्वाज^ ऋजिश्वा,ऽष्टम्यादि द्वयो.राङ्गिरस^ ऊर्ध्वसद्मा, दशम्यादि द्वयो.राङ्गिरसः कृतयशा^, द्वादश्यादि द्वयो.र्ऋणञ्चय,श्चतुर्दश्यादि तिसृणां वासिष्ठ. श्शक्ति.रित्यृषयः, पवमान.स्सोमो देवता, अयुजः ककुभो-युज. स्सतोबृहत्यः, स^ सुन्वे य^ इति यवमध्या गायत्री।

❀07.05.17 卐पवस्व मधुमत्तम^- इन्द्राय सोम क्रतुवित्तमो मदः। महि द्युक्षतमो मदः।।

卐 यस्य ते पीत्वा वृषभो वृषायते-ऽस्य पीता स्वर्विदः। स^ सुप्रकेतो अभ्यक्रमी.दिषो-ऽच्छा वाज.न्नैतशः।।

卐 त्वं ह्य1(अ)ङ्ग दैव्या- पवमान जनिमानि द्युमत्तमः। अमृतत्वाय घोषयः।।

卐 येना नवग्वो दध्य.ङ्ङपोर्णुते- येन विप्रास^ आपिरे। देवानां सुम्ने अमृतस्य चारुणो- येन श्रवां.स्यानशुः।।

卐 एष^ स्य^ धारया सुतो-ऽव्यो वारेभिः पवते मदिन्तमः। क्रीळ.न्नूर्मि.रपामिव।।

❀07.05.18 卐य^ उस्त्रिया^ अप्या^ अन्त.रश्मनो- नि.र्गा^ अकृन्त.दोजसा। अभि व्रज.न्तत्निषे गव्य.मश्व्यँ- वर्मीव धृष्ण.वा रुज।।

卐 आ सोता परि॒षिञ्चता-ऽश्व.न्न स्तोम.मप्तुरं रजस्तुरम्। वनक्रक्ष.मुदप्रुतम्।।

卐 सहस्रधारँ वृषभं पयोवृधं- प्रिय.न्देवाय जन्मने। ऋतेन य^ ऋतजातो विवावृधे- राजा देव^ ऋतं बृहत्।।

卐 अभि द्युम्नं बृह.द्यश^- इष.स्पते दिदीहि देव देवयुः। वि कोशं मध्यमँ युव।।

卐 आ वच्यस्व सुदक्ष चम्वो.स्सुतो- विशाँ वह्नि.र्न विश्पतिः। वृष्टि.न्दिवः पवस्व रीति.- मपा.ञ्जिन्वा गविष्टये धियः।।

❀07.05.19 卐एत.मु त्यं मदच्युतं- सहस्रधारँ वृषभ.न्दिवो दुहुः। विश्वा वसूनि बिभ्रतम्।।

卐 वृषा वि जज्ञे जनय.न्नमर्त्यः- प्रतप.न्ज्योतिषा तमः। स^ सुष्टुतः कविभि. र्निर्णिज.न्दधे- त्रिधात्वस्य दंससा।।

卐 स^ सुन्वे यो वसूनाँ- यो राया.मानेता य^ इळानाम्। सोमो य.स्सुक्षितीनाम्।।

卐 यस्य न^ इन्द्रः पिबा.द्यस्य मरुतो- यस्य वाऽर्यमणा भगः। आ येन मित्रावरुणा करामह- एन्द्र.मवसे महे।।

卐 इन्द्राय सोम पातवे- नृभि.र्यत.स्स्वायुधो मदिन्तमः। पवस्व मधुमत्तमः।।

卐 इन्द्रस्य हार्दि सोमधान.मा विश- समुद्रमिव सिन्धवः। जुष्टो मित्राय वरुणाय वायवे- दिवो विष्टम्भ^ उत्तमः।।

9.111 **परि प्रेति द्वाविंश.त्यृचस्य सूक्तस्यैश्वरयो धिष्ण्याऽग्नयः, पवमान.स्सोमो- द्विपदा विराट्।**

❀07.05.20 卐परि प्र धन्वेन्द्राय सोम- स्वादु.र्मित्राय पूष्णे भगाय।।

卐 इन्द्र.स्ते सोम सुतस्य पेयाः- क्रत्वे दक्षाय विश्वे च देवाः।।

卐 एवाऽमृताय महे क्षयाय- स^ शुक्रो अर्ष दिव्यः पीयूषः।।

卐 पवस्व सोम महा.न्त्समुद्रः- पिता देवानाँ विश्वाऽभि धाम।।

卐 शुक्रः पवस्व देवेभ्य.स्सोम- दिवे पृथिव्यै श.ञ्च प्रजायै।।

卐 दिवो धर्ताऽसि शुक्रः पीयूष.-स्सत्ये विधर्म.न्वाजी पवस्व।।

卐 पवस्व सोम द्युम्नी सुधारो- महा.मवीना.मनु पूर्व्यः।।

卐 नृभि.र्येमानो जज्ञानः पूतः-≈क्षर.द्विश्वानि मन्द्र.स्स्वर्वित्।।

卐 इन्दुः पुनानः प्रजा.मुराणः- कर.द्विश्वानि द्रविणानि नः।।

卐 पवस्व सोम क्रत्वे दक्षाया-ऽश्वो न निक्तो वाजी धनाय।।

❀07.05.21 卐त.न्ते सोतारो रसं मदाय- पुनन्ति सोमं महे द्युम्नाय।।

卐 शिशु.ञ्जज्ञानं हरिं मृजन्ति- पवित्रे सोम.न्देवेभ्य^ इन्दुम्।।

卐 इन्दुः पविष्ट चारु.र्मदाया-ऽपा मुपस्थे कवि.र्भगाय।।

卐 बिभर्ति चा.र्विन्द्रस्य नाम- येन विश्वानि वृत्रा जघान।।

卐 पिब.न्त्यस्य विश्वे देवासो- गोभि.श्श्रीतस्य नृभि.स्सुतस्य।।

卐 प्र सुवानो अक्षा.'स्सहस्त्रधार.-स्तिरः पवित्रँ वि वार.मव्यम्।।

卐 स^ वाज्यक्षा.'स्सहस्त्ररेता^- अद्भि.र्मृजानो गोभि.श्श्रीणानः।।

卐 प्र सोम याहीन्द्रस्य कुक्षा- नृभिर्येमानो अद्रिभि.स्सुतः।।

卐 असर्जि वाजी तिरः पवित्र.-मिन्द्राय सोम.स्सहस्त्रधारः।।

卐 अञ्ज.न्त्येनं मध्वो रसे.-नेन्द्राय वृष्ण इन्दुं मदाय।।

卐 देवेभ्य.स्त्वा वृथा पाजसे-ऽपो वसानं हरिं मृजन्ति।।

卐 इन्दु.रिन्द्राय तोशते नि तोशते- श्रीण.न्नुग्रो रिण.न्नपः।।

9.112 पर्यू.ष्विति द्वादशर्चस्य सूक्तस्य, त्र्यरुण.त्रसदस्यू राजानौ- पवमान स्सोमः, आद्या.स्तिस्रोऽनुष्टुभः पिपीलिकमध्याः- चतुर्थ्यादि षळूर्ध्वबृहत्यो-ऽन्त्या.स्तिस्रो विराजः।

❀07.05.22 卐पर्यू ¤षु प्र धन्व वाजसातये- परि वृत्राणि सक्षणिः। द्विष.स्तरध्या ऋणया^ न^ ईयसे।।

卐 अनु हि त्वा सुतं सोम मदामसि- महे समर्यराज्ये। वाजा॰ अभि पवमान प्र गाहसे।।

卐 अजीजनो हि पवमान सूर्यँ- विधारे शक्मना पयः। गोजीरया रंहमाणः पुरन्ध्या।।

卐 अजीजनो अमृत मर्त्ये.ष्वा॰- ऋतस्य धर्म.न्नमृतस्य चारुणः। सदाऽसरो वाज.मच्छा ¤सनिष्यदत्।।

卐 अभ्यभि हि श्रवसा ततर्दि.-थोत्स.न्न क.ञ्चि.ज्जनपान.मक्षितम्। शर्याभि.र्न भरमाणो गभस्त्योः।।

卐 आ.दी.ङ्के चि.त्पश्यमानास^ आप्यँ- वसुरुचो दिव्या^ अभ्यनूषत। वार.न्न देव. स्सविता व्यूर्णुते।।

❀07.05.23 卐त्वे~ सोम प्रथमा^ वृक्तबर्हिषो- महे वाजाय श्रवसे धिय.न्दधुः। स^ त्व.न्नो वीर वीर्याय चोदय।।

卐 दिवः पीयूषं पूर्व्यँ य.दुक्थ्यं- महो गाहा.द्दिव^ आ नि.रधुक्षत। इन्द्र.मभि जायमानं स.मस्वरन्।।

卐 अध य.दिमे~ पवमान रोदसी~- इमा च विश्वा भुवनाऽभि मज्मना। यूथे न निष्ठा^ वृषभो वि तिष्ठसे।।

卐 सोमः पुनानो अव्यये वारे- शिशु.र्न क्रीळ.न्पवमानो अक्षाः‘। सहस्रधार.श्शतवाज^ इन्दुः।।

卐 एष^ पुनानो मधुमाॅं ऋता-वेन्द्रा.येन्दुः पवते स्वादु.रूर्मिः। वाजसनि. र्वरिवोवि.द्वयोधाः।।

卐 स^ पवस्व सहमानः पृतन्यू.-न्त्सेध.न्रक्षां.स्यप दुर्गहाणि। स्वायुध. स्सासह्वा.न्त्सोम शत्रून्।।

9.113 **अया रुचेति तृचस्य सूक्तस्य, पारुच्छेपि.रनानतः- पवमान.स्सोमो-ऽत्यष्टिः।**

❀07.05.24 卐अया रुचा हरिण्या पुनानो- विश्वा द्वेषांसि तरति स्वयुग्वभि.-स्सूरो न स्वयुग्वभिः। धारा सुतस्य रोचते- पुनानो अरुषो हरिः। विश्वा य.द्रूपा परिया.त्यृक्वभि.-स्सप्ताऽऽस्येभिर् ऋक्वभिः।।

卐 त्व.न्त्य.त्पणीनाँ विदो वसु- सं मातृभि.र्मर्जयसि स्व आ दम- ऋतस्य धीतिभि.र्दमे। परावतो न साम त.-द्यत्रा रणन्ति धीतयः। त्रिधातुभि.ररुषीभि.र्वयो दधे- रोचमानो वयो दधे।।

卐 पूर्वा.मनु प्रदिशँ याति चेकित.-त्सं रश्मिभि.र्यतते दर्शतो रथो- दैव्यो दर्शतो रथः। अग्म.न्नुक्थानि पौं.-स्येन्द्र.ञ्जैत्राय हर्षयन्न्। वज्र.श्च य.द्भवथो अनपच्युता- सम.त्स्वनपच्युता।।

9.114 **नानान.मिति चतुर्ऋचस्य सूक्तस्याऽऽङ्गिरस. श्शिशुः- पवमान. स्सोमः- पङ्क्तिः।**

07.05.25 卐नानानँ वा उ नो धियो- वि व्रतानि जनानाम्। तक्षा रिष्टं रुतं भिष.-ग्ब्रह्मा सुन्वन्त.मिच्छ.-तीन्द्रायेन्दो~ परि स्रव।।

卐 जरतीभि.रोषधीभिः- पर्णेभि.श्शकुनानाम्। कार्मारो अश्मभि.द्युंभि.-र्हिरण्यवन्त.मिच्छ.-तीन्द्रायेन्दो~ परि स्रव।।

卐 कारु.रह.न्ततो भिष.-गुपलप्रक्षिणी नना। नानाधियो वसूयवो-ऽनु गा^इव तस्थि-मेन्द्रायेन्दो~ परि स्रव।।

卐 अश्वो वोळ्हा सुखं रथं- हसना.मुपमन्त्रिणः। शेपो रोमण्वन्तौ भेदौ-वा.रि.न्मण्डूक^ इच्छ.-तीन्द्रायेन्दो परि स्रव।।

9.115 **शर्यणावती.त्येकादशर्चस्य सूक्तस्य, मारीचः कश्यपः पवमान.स्सोमः- पङ्क्तिः।**

07.05.26 卐शर्यणावति सोम.-मिन्द्रः पिबतु वृत्रहा। बल.न्दधान^ आत्मनि- करिष्य.न्वीर्यं मह.-दिन्द्रायेन्दो~ परि स्रव।।

卐 आ पवस्व दिशां पत- आर्जीका.त्सोम मीढ्वः। ऋतवाकेन सत्येन-श्रद्धया तपसा सुत^- इन्द्रायेन्दो^ परि स्रव।।

卐 पर्जन्यवृद्धं महिष.-न्तं सूर्यस्य दुहिताऽऽऽभरत्। त.ङ्गन्धर्वाः प्र.त्यगृभ्ण.-न्तं सोमे रस.माऽदधु.-रिन्द्रायेन्दो~ परि स्रव।।

卐 ऋतँ वद.न्नृतद्युम्न- सत्यँ वद.न्त्सत्यकर्मन्न्। श्रद्धाँ वद.न्त्सोम राज.-न्धात्रा सोम परिष्कृत^- इन्द्रायेन्दो~ परि स्रव।।

卐 सत्यमुग्रस्य बृहत.-स्सं स्रवन्ति संस्रवाः। सँ यन्ति रसिनो रसाः- पुनानो ब्रह्मणा हर- इन्द्रायेन्दो~ परि स्रव।।

❀07.05.27 卐यत्र ब्रह्मा पवमान- छन्दस्या3(आँ) वाचँ वदन्न्। ग्राव्णा सोमे महीयते- सोमेनाऽऽनन्द.ञ्जनय.-न्निन्द्रायेन्दो~ परि स्रव।।

卐 यत्र ज्योति.रजस्रँ- यस्मि.न्लोके स्वर्हितम्। तस्मि.न्मा.न्धेहि पवमाना-ऽमृते लोके अक्षित- इन्द्रायेन्दो~ परि स्रव।।

卐 यत्र राजा वैवस्वतो- यत्राऽवरोधन.न्दिवः। यत्राऽमू.र्यह्वती.राप.-स्तत्र मा. ममृत.ङ्कृ.-धीन्द्रायेन्दो~ परि स्रव।।

卐 यत्राऽनुकाम.ञ्चरण.-न्त्रिनाके त्रिदिवे दिवः। लोका^ यत्र ज्योतिष्मन्त.-स्तत्र मा.ममृत.ङ्कृ.-धीन्द्रायेन्दो~ परि स्रव।।

卐 यत्र कामा^ निकामा.श्च- यत्र ब्रध्नस्य विष्टपम्। स्वधा च यत्र तृप्ति.श्च-तत्र मा.ममृत.ङ्कृ.-धीन्द्रायेन्दो~ परि स्रव।।

卐 यत्राऽऽनन्दा.श्च मोदा.श्च- मुदः प्रमुद^ आसते। कामस्य यत्राऽऽप्ताः कामा.-स्तत्र मा.ममृत.ङ्कृ-धीन्द्रायेन्दो~ परि स्रव।।

9.116 य इन्दोरिति चतुर्ऋचस्य सूक्तस्य, मारीचः कश्यपः पवमान.स्सोमः- पङ्क्तिः।

❀07.05.28 卐य^ इन्दो॰ पवमानस्या-ऽनु धामा.न्यक्रमीत्। त.माहु. स्सुप्रजा^ इति- य.स्ते सोमाऽविध.न्मन^- इन्द्रायेन्दो~ परि स्रव।।

卐 ऋषे मन्त्रकृतां स्तोमै॰- कश्यपोद्वर्धय.न्गिरः। सोम.न्नमस्य राजानँ- यो जज्ञे वीरुधां पति.-रिन्द्रायेन्दो~ परि स्रव।।

卐 सप्त दिशो नानासूर्या.-स्सप्त होतार^ ऋत्विजः। देवा^ आदित्या^ ये सप्त-तेभि.स्सोमाऽभि रक्ष न^- इन्द्रायेन्दो~ परि स्रव।।

卐 य.त्ते राज.न्छृतं हवि.-स्तेन सोमाऽभि रक्ष नः। अरातीवा मा न.स्तारी.-न्मो~ च न॰ कि.ञ्चना.ऽऽमम.-दिन्द्रायेन्दो~ परि स्रव।।

✡।। अथ परिशिष्टम्।।

卐 यत्र त.त्परमं पदँ- विष्णो. र्लोके महीयते। देवै. स्सुकृतकर्मभि.-स्तत्र मा. ममृत.ङ्कृधीन्द्रायेन्दो~ परि स्रव।।

卐 यत्र तत्परमाय्यं- भूताना.मधिपतिम्। भावभावी च योगी च- तत्र मा ममृत.ङ्कृधीन्द्रायेन्दो~ परि स्रव।।

卐 यत्र लोका. स्तनूत्यज.-श्श्रद्धया तपसा जिताः। तेज.श्च यत्र ब्रह्म च-तत्र मा ममृत.ङ्कृधीन्द्रायेन्दो~ परि स्रव।।

卐 यत्र गङ्गा च यमुना च- यत्र प्राची सरस्वती। यत्र सोमेश्वरो देव.-स्तत्र मा. ममृत.ङ्कृधीन्द्रायेन्दो~ परि स्रव।।

卐 यत्र त.द्विष्णु. मंहीयते- नराणा. मधिपतिम्। यत्र शङ्खचक्रगदाधरस्मरणं मुक्तिश्च- तत्र मा ममृत.ङ्कधीन्द्रायेन्दो~ परि स्रव।। इति परिशिष्टम्।। ।।

इति नवमं मण्डलम्।। विश्वेश्वराय नमः....

## पवमान मन्त्राणा मृषि च्छन्दो देवताः

- नवमं मण्डलं पावमानं सौम्यम्।
- स्वादिष्ठया दश मधुच्छन्दाः, पवस्व मेधातिथिः, एष शुनश्शेपः, सन हिरण्यस्तूपः, समिद्ध एकादश, काश्यपो ऽसितो देवलो वा, विंशति स्सूक्ता न्याद्यमाप्रिय श्चतुरनुष्टुबन्तं, मन्द्रया नव, असृग्र, मेते सोमाः, परि प्रिया, प्रस्वानास, उपास्मै, सोमा असृग्रम्।। 1।।
- सोमः परि प्राष्टौ, एष धिया, प्र ते, प्र निम्नेनेव, परि सुवान स्सप्त, यत्सोम प्रकविः, एते धावन्ति, एते सोमासः, सोमा असृग्रं, प्रसोमासः, पवस्व षड्, दृह्ळच्युत आगस्त्यः, तममृक्षन्तेध्मवाहो दाह्ळंच्युतः, एष कविर्नृमेधः, एष वाजी प्रियमेधः, प्रास्य नृमेधः, प्रधारा बिन्दुः, प्रसोमासो गोतमः, प्रसोमासश्श्यावाश्वः, प्रसोमास स्त्रितः, प्रसुवान, आ नः पवस्व प्रभूवसुः, असर्जि ससुतो रहूगुणः, एष उस्य आशुरर्ष बृहन्मतिः, प्र ये गावो मेध्यातिथिः, जनयन् यो अत्य इव।2
- प्रणोऽयास्यः, स पवस्वा-सृग्र-न्नया सोमः, पञ्च कवि र्भार्गवः, तन्त्वा पवस्वोत्ते शुष्मास उचथ्यः, अध्वर्यो परिद्युक्ष उत्ते चतुष्कमवत्सारः, अस्य प्रत्नां - यवं यवं - परि सोमः- प्रते धारा – स्तरत् – स पवस्व

प्रगायत्रेण- उपान्त्या पुर उष्णिक्। अयावीती त्रिंशद् महीयु रेते असृग्रं, जमदग्नि रापवस्व निध्रुविः, काश्यपो, वृषा सोम कश्यपः।। 3।।

- हिन्वन्ति भृगु र्वारुणि र्जमदग्नि र्वा, पवस्व शतं वैखानसा अष्टादश्यनुष्टुप्, परा स्तिस्त्र आग्नेय्यः, त्वं सोमासि द्वात्रिंशत्, भरद्वाजः कश्यपो गोतमोऽत्रि र्विश्वामित्रो जमदग्नि र्वसिष्ठ इतीह तृचास्सप्तर्षयः। शेषे पवित्रो वसिष्ठो वोभौ वा पवस्व सोम तिस्त्रो नित्य द्विपदा गायत्र्यः, अवितान स्तिस्त्रः पौष्ण्यो वा यत्ते पवित्रं पञ्चाऽऽग्नेय्य स्सावित्र्यग्नि सावित्री वैश्वदेवी वा, सामन्त्यास्त्रिंशीः, पुर उष्णिक्, सप्त विंशी, अनुष्टुबन्त्ये च ते पावमान्यध्येतृ स्तुती।। 4।।
- भद्रन्नो अपि वातय मनः।। ॐ शान्ति श्शान्ति श्शान्तिः।।
- शान्ता पृथिवी शिव मन्तरिक्ष न्द्यौर्नो देव्यभय न्नो अस्तु। शिवादिशः प्रदिश उद्दिशो न आपो विश्वतः परि पान्तु सर्वतः।। ॐ शान्ति श्शान्ति श्शान्तिः।।

## पवमान (होमादि) प्रयोग सङ्कल्पः

- मम गर्भे वसतः, जातस्य, जायमानस्य, वर्धमानस्य च, यदुग्रं पापं
- मातृ – पितृ – वचनोल्लङ्घनात्, स्थावर – जङ्गम हरणात्,
- गोवधात्, चौर्यात्, स्त्रीवधात्,
- क्रय विक्रयात्, योनिदोषात्, अभक्ष्य – भक्षणात्, अभ्योज्य – भोजनात्, असत्प्रतिग्रहात्, असंभोजनाच्च यत्पापं,
- बालहननात्, मातृ पितृ वधात्, भूमितस्करत्वात्, सर्ववर्णगमनात्,
- अकृतयजनात्, अकृताध्ययनात्, अज्ञानाच्च यत्पापं,
- अयाच्य याचनात्, अयाज्य याजनात्, अमन्त्रान्न भोजनाच्च यत्पापं,
- औपसन, वैश्वदेवादि नित्यकर्माकरणाच्च यत्पापं,
- संवत्सरकृत - अशेष पापक्षय द्वारा, मम शरीरशुद्ध्यर्थं,
- पवमान – होमोक्त फल सिद्धये च
- पवमानमन्त्रैः होष्यामि/ पवमान मन्त्र पारायणं करिष्ये/ पवमान मन्त्रपारायण पुरस्सरमभिषेचनं करिष्ये।

# अन्वाधानम्

- .. .. .. अग्नीषोमौ चक्षुषी आज्येन,
- पवमानं सोमं चत्वारिंशद्वारम्(40),
- समिद्धमग्निं पवमानमेकवारम् (1),
- तनूनपातमग्निं पवमानमेकवारम् (1)
- इळोग्निं पवमानमेकवारम् (1),
- बर्हिरग्निं पवमानमेकवारम् (1),
- देवीर्द्वारोऽग्निं पवमानमेकवारम् (1)
- उषासानक्ताऽग्नि पवमानमेकवारम् (1),
- दैव्या होतारा प्रचेतसाऽग्निं पवमानमेकवारम् (1),
- तिस्रो देवीस्सरस्वतीळा भारतीरग्निं पवमानमेकवारम् (1)
- त्वष्टारमग्निं पवमानमेकवारम् (1)
- वनस्पतिमग्निं पवमानमेकवारम् (1),
- स्वाहाकृतिमग्निं पवमानमेकवारम् (1),
- सोमं पवमानं पञ्चदशोत्तर पञ्चशतवारम् (515),
- अग्निं पवमानन्त्रिवारम् (3),
- सोम पवमान मष्टादशवारम् (18),
- पूषणं पवमान न्त्रिवारम्(3),
- सोमं पवमान न्दशवारम्(10),
- अग्निं पवमान न्द्विवारम्(2),
- सवितारं पवमानमेकवारम्(1),

- अग्निसवितारौ पवमानमेकवारम्(1),
- सवितारं पवमानमेकवारम्(1),
- अग्निसवितारौ पवमानमेकवारम् (1),
- विश्वान् देवान् पवमानमेकवारम् (1)
- सोमं पवमानन्त्रिवारम् (3),
- पावमान्यध्येतारं पवमानन्द्विवारम् (2)।

## दानमन्त्राः

- गोदानम् – गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश। यस्मात् तस्माच्छिवं मे स्यादत श्शान्तिं प्रयच्छ मे।।
- क्षीर दानम् - अलक्ष्मीं हरते क्षिप्रं सुख सौभ्याग्य दायकम्। क्षीरं मांगल्य मायुष्यं, अत श्शान्तिं प्रयच्छ मे।
- आज्यदानम् - कामधेनु समुद्भूतं देवाना मुत्तमं हविः।
  आयु र्विवर्धनं दातु  राज्यं पातु सदैव माम्।
- मधुदानम् - यस्माच्छ्राद्धे पितृणाञ्च, पीतं मध्वमृतोद्भवम्। अतस्तस्य प्रदानेन मोक्ष स्स्याद्दुःख सागरात्।।
- उदकदानम् - पानीयं पावनं श्रेष्ठं प्राणिनां उपजीवनम्। तस्मात् पानीय दानेन शान्ति रस्तु सदा शुभा।